Advaita-siddhi. An essay on the Non-dual theory of the modern Vedántins, establishing the illusory character of all created objects, and refuting the Nyáya theory. By Madhusúdana Sarasvatí, disciple of Vis'ves'vara Sarasvatí. Mr. Hall notices an abridgment of this work under the name of Nyáya-ratnávali. *Contributions* pp. 109—157.

Beginning. यो यः कल्पितमाद्यतामुखमृषाद्वैतप्रपञ्चात्ययः
सत्यज्ञानसुखात्मकः श्रुतिशिखोत्थाखण्डधीगोचरः।
मिथ्यावस्त्वविधूननेन परमानन्दैकतानात्मकं
मोक्षं प्राप्त इव स्वयं विजयते विष्णुर्विकल्पोज्झितः ॥ १ ॥
श्रीरामविश्वेश्वरमाधवानामैक्येन साक्षात्कृतमाधवानां।
स्पर्शेन निर्धूततमोरजोभ्यः पादोत्थितेभ्यस्तु नमो रजोभ्यः ॥ २ ॥
बहुभिर्विहिता बुधैः परार्थं विजयन्ते मितविस्तरा निबन्धाः।
मम तु श्रम एष नूनमात्मभरितां भावयितुं भविष्यतीह ॥ ३ ॥
————मणिना मधुसूदनेन सङ्गृह्य शास्त्रनिचयं रचितातियत्नात्।
बोधाय वादिविजयाय च सत्त्वराणामद्वैतसिद्धिरियमस्तु मुदे बुधानाम् ॥ ४ ॥

End. प्रातिभासिकलक्षणञ्च व्याप्तं तथापि करणसंसर्गिदोषप्रयुक्तत्वं तद्संसर्गिदोष-प्रयुक्तत्वञ्च तयोर्लक्षणं निरवद्यं। सत्त्वत्रैविध्योपपत्तिः ॥ ५२ ॥
अविद्यातत्कार्यात्मकनिविडबन्धव्यपगमे
यमद्वैतं सत्यप्रततपरमानन्दमसृतं।
भजन्ते भूमानं भवभयभिदं भव्यमतयो
नमस्तस्मै नित्यं निखिलनिगमेशाय हरये ॥
अनादिसुखरूपता निखिलदृश्यनिर्मुक्तता
निरन्तरमनन्तता स्फुरणरूपता च स्वतः।
त्रिकालपरमार्थता त्रिविधभेदशून्यात्मता
मम श्रुतिशतार्पित+दृहमस्मि पूर्णो हरिः ॥

Colophon. इति श्रीमत्परमहंसपरिव्राजकाचार्यविश्वेश्वरसरस्वतीश्रीचरणशिष्यश्रीमधुसूदन-सरस्वतीविरचितायामद्वैतसिद्धौ सपरिकरप्रपञ्चमिथ्यात्वनिरूपणं नाम प्रथमः परिच्छेदः समाप्तः।

विषयः। सपरिकरप्रपञ्चमिथ्यात्वनिरूपणं।

L of C

No. 1504. न्यायत्रिसूत्रीवार्त्तिकं ।

Substance, country-made paper, 14 × 5½ inches. Folia, 17. Lines, 4—9—10 on a page. Extent, 515 s'lokas. Character, Bengali. Date, ? Place of deposit, Calcutta, Government of India. Appearance, fresh. Prose. Incorrect.

Nyáya-trisutrí-vártika. A commentary on the first three aphorsms of the Nyáya Sútra of Gotama, comprising an epitome of the Nyáya doctrine. By Udyotakara Áchárya.

Beginning. यदक्षपादः प्रवरो मुनीनां शमाय शास्त्रं जगतो जगाद ।
कुतार्किकाज्ञाननिवृत्तिहेतुः करिष्यते तस्य मया निबन्धः ॥

iEnd. प्रधानं प्रत्यक्षं इति यत्र संन्यायसूत्र्येवं यत्र पुनर्व्यवस्था तत्र गुणप्रधानतानाश्चिन्त्यत इति ।

Colophon. इति श्रीपरमर्षिभारद्वाजश्रीमदुद्योतकरन्यायाचार्य्यप्रणीतं न्यायत्रिसूत्रीवार्त्तिकं सम्पूर्णं ॥

विषयः । गोतमोक्तसूत्रत्रयव्याख्यानेन समस्तगोतमसूत्रतात्पर्य्यकथनं ॥

No. 1505. ज्योत्स्ना, हिरण्यकेशिसूत्रव्याख्या ।

Substance, country-made yellow paper, 13¼ × 5¼ inches. Folia, 126. Lines, 9 on a page. Extent 1,366 s'lokas. Character, Nágara. Date, Sm. 1851. Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Incorrect.

Jyotsná alias *Hiraṇyakes'í-sútra-vyákhyá.* A commentary on the Kalpa Sútra of Hiraṇyakes'í. By an unknown author. The MS. is incomplete, ending at the tenth Prasṇa, and wanting 16 leaves at the end.

Beginning. उक्ता अग्निष्टोमादयः संस्थाः यस्यैकादशिनी (?) यूपैकादशिन्यौ च अथेदानीमग्निष्टोमादिष्वाकाङ्क्षितं याजमानकर्म्म वक्तुं शिष्यावधानाय प्रतिजानीते ॥ अग्निष्टोमस्य याजमानं व्याख्यास्यामः ।

End.

Colophon. श्रीमद्भगवत्सत्याषाढहिरण्यकेशिसूत्राम्बुधिगतनिगूढार्थरत्नाभिलाभकृतविद्वज्जनमन्त्रापशमिकायां ज्योत्स्नाख्यायां वृत्तौ दशमप्रश्नस्याष्टमः पटलः । समाप्तो दशमः प्रश्नः ॥

विषयः । हिरण्यकेशिसूत्रव्याख्यानं । पुस्तकमिदं एकशतत्रयस्त्रिंशत्पत्रे सम्पूर्णं परन्तु एकशतसप्तविंशतिपत्रावधि एकशतद्वात्रिंशत्पत्रपर्य्यन्तं नास्ति ।

No. 1506. नैषधः, दीपिकाख्यटीकासहितः ।

Substance, country-made paper, 15¼ × 7 inches. Folia, 381. Lines. 10.—12—18 on a page. Extent, 13,358 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, new. Text, verse. Commentary, prose. Incorrect.

Dípiká alias *Naishadha-dípiká.* A commentary on the well-known Epic poem called *Naishadha*, on the adventures of Nala. By Narahari.

Beginning. (मू०) । निपीय यस्य क्षितिरक्षिणः कथां तथाद्रियन्ते न बुधाः सुधामपि ।
नलः सितच्छत्रितकीर्त्तिमण्डलः स राशिरामीन्महसां महोज्ज्वलः ॥

(टी०) । पारं प्रवन्धाम्बुनिधेः प्रयातुं यत्नः किल स्वान्त तवैष हन्त ।
निःश्वासलीलानिहतान्तरायहेरम्बसालम्बनमाश्रयेथाः ॥ १ ॥
त्वदनुग्रहलेशमाचलाभाद्यियमुच्छृङ्खलगामिनी मनीषा ।
अपि कर्षति मामगम्यभूमौ शरणं मे भव सारदे नमस्ते ॥ २ ॥
अज्ञानतिमिरपाटनपटीयसीं शुभगुणोदयोज्ज्वसितां ।
नीराजनाय करवै प्रदीपिकां काव्यसद्मराजः ॥ ३ ॥

End. (मू०) । श्रीहर्षं कविराजराजिमुकुटालङ्कारहीरः सुतं
श्रीहीरः सुषुवे जितेन्द्रियचयं मा मल्लदेवी च यं ।
द्वाविंशो नवसाहसाङ्क(?)चरिते चम्पूकृतोऽयं गतः
काव्ये तस्य कृतौ नलीयचरिते सर्गो निसर्गोज्ज्वलः ॥

Colophon. इति श्रीनैषधीये महाकाव्ये द्वाविंशः सर्गः ॥ नैषधः सम्पूर्णः ॥

(टी०) । य प्रासूत त्रिलिङ्गक्षितिपतिसततताराधिताङ्घ्रिः स्वयम्भूः
पातिव्रत्यैकसीमास्वकरिनरहरिं नालमायच्च(?) माता ।
यं विद्यारण्ययोगी कलयति कृपया तत्कृतौ दीपिकायां
द्वाविंशस्यारुसर्गः सुकृतसुयशसो धाम नीराजितोऽभूत् ॥
इति श्रीनैषधीये महाकाव्ये शशाङ्कवर्णनं नाम द्वाविंशः सर्गः ॥

विषयः । नैषधचरितवर्णनं ।

No. 1507. मीमांसाशास्त्रसर्व्वस्वं ।

Substance, country-made paper, $14\frac{1}{2} \times 3\frac{3}{4}$ inches. Folia, 82. Lines, 4—5—7—8 on a page. Extent, 2,730 s'lokas. Character, Bengali. Date, ? Place of deposit, Calcutta, Government of India. Appearance, fresh. Prose. Correct.

Mímáñsá-s'ástra-sarvas'va alias *Mímáñsá-sarvas'va*. An epitome of the Mímáñs'á doctrine. By Haláyudha, the Minister of Lakshmana Sena of Bengal, and author of several works, such as the *Bráhmáṇa Sarvas'va*, *Smṛiti Sarvas'va*, &c. Hall's *Contributions*, &c., pp. 182—207. Journal As. Soc. 1865, p. 128.

Beginning. इह खलु साङ्गवेदाध्ययनानन्तरं विचारकर्त्तव्यतार्थं गुरुगृहवासावसाननिवृत्तिं प्रतिपादयितुं जैमिनिना आद्यसूत्रं प्रणीतं । तत्र स्वाध्यायोऽध्येतव्य इत्यनेन विहितायां भावनायां भाव्याकाङ्क्षायां किं विश्वजिन्न्यायात् स्वर्गः फलं उताक्षरादिग्रहणद्वारा वा वाक्यार्थज्ञानमिति सन्देहः ॥

End. तन्नियमस्यापि इष्टमेव प्रयोजनं तेषां करिष्यमाणप्रयोगकर्म्मकौशलं भक्षणादिसामर्थ्यं भवतीति । तस्मात् भक्षार्थोऽयमुपदेश इति सिद्धं ॥

Colophon. इति मीमांसाशास्त्रसर्व्वस्वे तृतीयाध्यायस्य चतुर्थः पादः ।

विषयः । सङ्क्षेपेण मीमांसकसिद्धान्तकथनं ।

No. 1508. रमलप्रश्नः ।

Substance, country-made paper, $6 \times 4\frac{3}{4}$ inches. Folia, 9. Lines, 9 on a page. Extent, 81 s'lokas. Character, Nágara. Date, Sm. 1860. Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Incorrect.

Ramala-pras'na. A treatise on cleromancy or divination with a set of dice. Author unknown.

Beginning. ॥ अ व ज द ॥ इत्यक्षरचतुष्टयं । पाशपार्श्वे लिखितव्यं ततः पाशकं हस्ते कृत्वा यत्किञ्चिद् भूतं भविष्यं वर्त्तमानञ्च मनसि अवधार्य्य ॥ देवतामन्त्रेण इत्यभिमन्त्रितं कृत्वा एकाग्रचित्तेन पाशकं वारत्रयं पातयितव्यं ।

End. हो देवतापूजेतो कार्य्यं हेदृगो ।

Colophon. इति प्रश्नः सम्पूर्णः ।

विषय । मन्त्रविशेषाभिमन्त्रितपाशविशेषद्वारा प्रश्नगणनं ।

No. 1509. ललितास्तवरत्नं ।

Substance, country-made paper, $8\frac{1}{2} \times 3\frac{1}{4}$ inches. Folia, 22. Lines, 6—7 on a page. Extent, 317 s'lokas. Character, Nágara. Date, Sm. 1851. Place of deposit, Calcutta, Government of India. Appearance, old. Verse. Incorrect.

Lalitá-stava-ratna. A hymn in praise of Lalitá, a form of Durgá. By the great sage (Ṛishi) Durvás'á.

Beginning. वन्दे गजेन्द्रवदनं वामाङ्कारूढवल्लभाश्लिष्टं ।
कुङ्कुमपरागशोणं कुवलयनीरजकोरकापीडं ॥

End. ललितायास्तवरत्नं ललितपदाभिः प्रणीतमार्य्याभिः ।
प्रतिदिनमवनौ पठतां फलानि वक्तुं प्रगल्भते सैव ॥

Colophon. इति श्रीदुर्व्वासऋषिकृतं ललितास्तवरत्नं सम्पूर्णं ।

विषयः । ललितादेवीस्तोत्रकथनं ।

No. 1510. तर्कामृतं ।

Substance, country-made paper, $7\frac{3}{4} \times 4$ inches. Folia, 12. Lines, 12—13—14 on a page. Extent, 351 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Incorrect.

Tarkámṛita. An elementary treatise on the Vais'esheka doctrine. By Jagádís'h Tarkálaṅkára. There are several commentaries and annotations on this work. Vide ante No. 144, and Hall's *Contributions*, p. 76.

Beginning. ब्रह्माद्या निखिलार्चिताखिदशसन्दोहाः सदाभीष्टदाः
स्वाज्ञानप्रशमाय यत्र मनसो वृत्तीः समस्ता दधुः ।
श्रीविष्णोश्चरणाम्बुजं भवभयध्वंसैकबीजं परं
हृत्पद्मे विनिधाय तं निरुपमं तर्कामृतं तन्यते ॥

End. विशेष्यमङ्गतस्य अन्ययोगव्यवच्छेदः पार्थ एव धनुर्धर इत्यादौ एवं दिशा सर्व्वं बोध्यं ।

Colophon. इति तर्कामृतं ।

विषयः । अत्र प्रथमं, आत्मा वारे द्रष्टव्यः श्रोतव्य इत्यादिश्रुतिव्याख्यानं । ततः द्रव्यप्रमाणकथनं । ततः द्रव्यनाशस्य द्वैविध्यकथनं । ततश्चतुर्व्विंशतिप्रकारगुण-

कथनं । ततः गुणोत्पत्तिप्रक्रियाकथनं । ततः कर्म्मोत्पत्तिप्रक्रियाकथनं । ततः प्रमात्मकज्ञानकथनं । ततः अनुमाननिरूपणं, हेत्वाभासनिरूपणञ्च । ततः उपमाननिरूपणं । ततः शब्दप्रमाणकथनं । ततः शाब्दबोधप्रक्रियाकथनं । ततः कारकविभक्त्याद्यर्थकथनं, आख्यातार्थकथनञ्च । ततः कृत्प्रत्ययार्थनिरूपणं, एवकाराद्यर्थनिरूपणञ्च ॥

No. 1511. मन्त्रभागवतः, मन्त्ररहस्यप्रकाशिकानामटीकासहितः ।

Substance, country-made paper, 11 × 5 inches. Folia, 40. Lines, 7—13 on a page. Extent, 1,624 s'lokas. Character, Nágara. Date, Sm. 1728. Place of deposit, Benares, Bábu Harishchandra. Appearance, old. Prose and verse. Corrected.

Mantra bhágavata. A compilation of mantras bearing on the worship of Ráma and Krishṇa, compiled from the Vedas and other ancient works, and illustrated and explained with a running commentary. By Nílakaṇṭha son of Govinda Suri. The commentary is named *Mantra-rahasya-prakás'iká.*

Beginning. (टी०) । सत्यं ज्ञानमनन्तं यत् तद्विष्णोः परमं पदं ।
प्राप्तुं मन्त्रेषु गोपालविष्णोः कर्म्माणि पश्यत ॥
ननु सत्यादिलक्षणमखण्डैकरसं विष्णोः परमं पदनीयं स्वरूपन्नेन्निरवद्ये तत्रा-विद्यावद्विषयाणि न सम्भवन्ति ।

(मू०) । तं नेमि स्तुभवो यथा नमस्व सदूतिभिः । नेदीयो यज्ञमङ्गिरः ॥ १ ॥

End. (मू०) । स समुद्रो अपीच्यस्तुरीयामिव रोहति निपदासु यजुर्दधे । समाया अर्चिना पदा सृणान्नाकमारुहन्नभं तामन्यके समे ॥ १० ॥

(टी०) । वाक्यार्थे व्यासवाल्मीकी पदार्थे यास्कपाणिनी ।
रामकृष्णकथां मन्त्रैर्गायतो मम नायकौ ॥ १ ॥
एतच्छतद्वयमृचां रामकृष्णकथानुगं ।
व्याख्यातं भगवांस्तेन तुष्यतात् सात्वतामपतिः ॥ २ ॥

Colophon. इति श्रीमत्पदवाक्यप्रमाणमर्यादाधुरन्धरचतुर्द्धरवंशावतंसगोविन्दसूरिसूनो-र्नीलकण्ठस्य कृतौ स्वोद्धृतमन्त्रभागवतव्याख्यायां मन्त्ररहस्यप्रकाशिकायां मधु-राकाण्डश्चतुर्थः ।

विषयः । रामकृष्णकथानुगानामृचां व्याख्यानं ।

No. 1512. अनुक्रमणिकाविवरणं ।

Substance, country-made paper, 12 × 5 inches. Folia, 47. Lines, 9 on a page. Extent, 1,057 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, new. Prose. Corrected.

Anukramaṇiká-vivaraṇa. An Index to the hymns of the Rig Veda, their deities, their authors, and their metres. By Jagannátha. The work follows the order of Saunaka's treatise on the subject.

Beginning. नमामि विष्णुं शिरसाऽव्ययं समं शिवञ्च सोमं वृषभेन्द्रगामिनं ।
गणाधिपं भक्तमनोरथप्रदं हरिञ्च वाक्सिद्धिकरीञ्च भारतीम् ॥ १ ॥
अनुक्रमणिकोक्तानि सूक्तादिप्रभृतीन्यहं ।
छन्दोर्गति(?) निबध्नामि जगन्नाथो यथामति ॥ २ ॥

End. समिति चतुष्कम् ४ । संवनन आङ्गिरसः सज्ञानमानुष्टुभम् । तृतीया त्रिष्टुप् । ६४ । ऋचः २१९ ।

Colophon. इति जगन्नाथकृते अनुक्रमणिकाविवरणे अष्टमाङ्कः समाप्तः ।

विषयः । ऋग्वेदीयमन्त्राणामृषिदैवतच्छन्दःसङ्ख्यानिर्णयः ।

No. 1513. हठदीपिका, ज्योत्स्नाख्यटीकासहिता ।

Substance, country-made paper, 11¾ × 6 inches. Folia, 105. Lines, 9—10—11—12—13 on a page. Extent, 1,000 s'lokas. Character, Nágara. Date, Sm. 1931. Place of deposit, Calcutta, Government of India. Appearance, new. Prose and verse. Generally correct.

Jyotsná alias *Haṭha-dípiká-ṭíká.* A commentary on the Haṭha-dípiká—a treatise on the performance of Yoga meditations. By Bráhmánanda. The MS. includes the text of Svátmáráma. Contents. I. Seats; II. Regulation of the breath; III. Gesticulations; IV. The peculiarities of perfect meditation, or exclusive devotion of the mind to the object of meditation.

Beginning. (मूलस्य) । श्रीआदिनाथाय नमोऽस्तु तस्मै येनोपदिष्टा हठयोगविद्या ।
विभ्राजते प्रोन्नतराजयोगमारोढुमिच्छोरधिरोहिणीव ॥ १ ॥

प्रणम्य श्रीगुरुं नाथं स्वात्मारामेण योगिना ।
केवलं राजयोगाय हठविद्योपदिश्यते ॥ २ ॥
भ्रान्त्या बहुमतध्वान्ते राजयोगमजानताम् ।
हठप्रदीपिकां धत्ते स्वात्मारामः कृपाकरः ॥ ३ ॥

(टीकायाः) । गुरुं नत्वा शिवं साक्षाद् ब्रह्मानन्देन तन्यते ।
हठप्रदीपिकाज्योत्स्ना योगमार्गप्रकाशिका ॥ १ ॥
इदानीन्तनानां सुबोधार्थमस्याः सुविज्ञाय गोरक्षसिद्धान्तार्द्धं
मया मेरुशास्त्रिप्रमुखाभिधात् स्फुटं कथ्यते अत्यन्तगूढोऽपि भावः ।
मुमुक्षुजनहितार्थं राजयोगद्वारा कैवल्यफलां हठप्रदीपिकां विधित्सुः
परमकारुणिकः स्वात्मारामयोगीन्द्रस्तत्प्रत्यूहनिवृत्तये हठयोगप्रवर्त्तकश्रीमदादि-
नाथनमस्कारलक्षणं मङ्गलं तावदाचरति, श्रीआदिनाथायेत्यादिना ॥

End. (मू०) । यावद्वैव प्रविशति चरन्मारुतो मध्यभागे
यावद्बिन्दुर्न भवति दृढः प्राणवातप्रबन्धात् ।
यावज्ज्ञाने सहजमदृशं जायते नैव तत्त्वं
तावज्ज्ञानं वदति तदिदं दम्भमिथ्याप्रलापः ॥ ११४ ॥

Colophon. इति श्रीसहजानन्दचिन्तामणिस्वात्मारामचिन्तामणियोगीन्द्रविरचितायां हठ-
दीपिकायां समाधिलक्षणं नाम चतुर्थोपदेशः समाप्तः ।

(टी०) । ग्राह्यमेव विदुषां हितं यतो भाषणं मम यदप्यसंस्कृतं ।
रक्ष गच्छति पयोनलहिलं ह्यंव(?) इत्यभिहितं शिशोर्यथा ॥
सदर्थद्योतनकरी तमःस्तोमविनाशिनी ।
ब्रह्मानन्देन ज्योत्स्नेयं शिवाङ्घ्रियुगलेऽर्पिता ॥
इति श्रीहठप्रदीपिकाव्याख्यायां ब्रह्मानन्दकृतायां ज्योत्स्नाभिधायां समाधि-
निरूपणं नाम चतुर्थोपदेशः ।

विषयः । १ प्रथमे, उपदेशाभिधप्रकरणे कूर्माद्यासनविधिकथनादिः । २, प्राणायाम-
प्रकारः । ३, खेचर्यादिमुद्राकथनं । ४, समाधिलक्षणकथनं ॥

No. 1514. हस्तमञ्जीवनं, भाष्यसहितं ।

Substance, country-made paper, $11\frac{3}{4} \times 5\frac{3}{4}$ inches. Folia, 13. Lines, 11—12 on a page. Extent, 390 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, new. Verse. Incorrect.

Hasta-sañjívana. A treatise on palmistry and divination. Author unknown.

Beginning. श्रीशङ्खेश्वरपार्श्वं प्रणमन् ध्यायंस्तमेव वृजिनवृषभं ।
हस्तप्रश्नस्य लक्षणपरीक्षणे दत्ततां वक्ष्ये ॥ १ ॥
श्रीनाभेयः प्रभुर्जीयात् सर्वज्ञो जगदीश्वरः ।
येन लाक्षणिकी विद्या निर्दिष्टा भुवनश्रिये ॥ २ ॥
श्रीवर्द्धमानो जयतु सर्वज्ञानिशिरोमणिः ।
पञ्चहस्ताक्षरो वीरः सिद्धार्थक्षपनन्दनः ॥ ३ ॥
अङ्गविद्या निमित्तानामष्टानामपि गीयते ।
मुख्या शुभाशुभज्ञाने नारदादिनिवेदिता ॥ ४ ॥

End. करस्पर्शात् स्पर्शादिव परिणतां काञ्चनमहा-
रमप्रेक्षन् सिद्धिं सगुरुवचसा मेऽद्य विजयात् ।
विदित्वा पृच्छानां य इह कुरुते निर्णयमहो
महोभिस्तस्य स्याद्भुवनभवनावामनविधिः ॥ ५४ ॥

Colophon. इति हस्तसञ्जीवने सिद्धज्ञाने हस्तस्पर्शनाधिकारः सम्पूर्णः ।

विषयः । १ प्रथमाधिकारे, हस्तप्रशंसा । हसे तीर्थादिध्यानेन पुण्यसाधनं । हस्ताङ्गुल्या-दिनामानि । हस्तावलोकनविधिः । तिथ्यानयनं । वारानयनं । नक्षत्रानयनं । राश्युपरिग्रहदर्शनं । वर्षदर्शनं । मासदर्शनं । पक्षदर्शनं । दिनदर्शनं । दिन-लग्नचक्रं । द्रेक्काणः । योगदर्शन । दिक्चक्रदर्शनं । देहचक्रदर्शनं । प्रथ-माधिकारः ।

२ अधिकारे, कराङ्गुलीस्पर्शानुसारेण प्रश्नगणनादिः। चन्द्रसूर्यादिस्वरज्ञानादिः।

No. 1515. पराशरहोरा उत्तरभागः ।

Substance, country-made paper, 11½ × 5¾ inches. Folia, 22. Lines, 13 on a page. Extent, 770 s'lokas. Character, Nágara. Date, Sm. 1931, S'k. 1796. Place of deposit, Calcutta, Government of India. Appearance, new. Verse. Incorrect.

Parásara-horá. On the division of time into *horás* or hours, and directions for the preparation of horoscopes. Parásara explains the subject in reply to queries by Maitreya; but the work in its present form is obviously of a later date and due to a compiler.

Beginning. भगवन सर्वमाख्यातं जातकं विस्तरेण मे ।
सप्तसहस्रायुतग्रन्थैरशीत्यध्यायसंयुतैः ॥ १ ॥
सङ्करात्तत्फलानान्तु ग्रहाणां गतिसङ्करात् ।
नान्येदमीदृगस्येयमिति वक्तुमलं नराः ॥ २ ॥
कलौ युगे ततोऽल्पैव बुद्धिः पापोत्तरा नराः ।
अतो न चास्य प्रचयगमनं न प्रयोजनम् ॥ ३ ॥
अत्र त्रेतायुगे केचिद् द्वापरे च कृते युगे ।
कुशाग्रमतयः सर्वे पुण्यभाजश्चिरायुषः ॥ ४ ॥
अतोऽल्पबुद्धिगम्यं यच्छास्त्रमेतद्वदस्व मे ।
लोकयात्रापरिज्ञानमायुषो निर्णयं तथा ॥ ५ ॥

End. वेदेभ्यश्च समुद्धृत्य ब्रह्मा प्रोवाच विस्तृतं ॥ ३ ॥
शास्त्रमाद्यं तदेवेदं वेदवेदाङ्गचक्षुषः ।
गर्गस्तस्मादतः प्राह मया तस्माद्यथा तथा ॥ ४ ॥
तदुक्तं तव मैत्रेय शास्त्रमाद्यन्तमेव हि ॥ ५ ॥

Colophon. इति श्रीपराशरहोरायामुत्तरभागे विंशोऽध्यायः ।

विषयः । राश्यर्द्धभागात्मकहोराविवरणं, तच्छुभाशुभकथनञ्च ।

No. 1516. बृहस्पतिसंहिता ।

Substance, country-made paper, 11½ × 6 inches. Folia, 123. Lines, 11 on a page. Extent, 3,551 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India; another copy, Calcutta, Bhavasaṅkara Vidyáratna. Appearance, new. Verse. Incorrect.

Vrihaspati Saṅhitá. A Smriti work on the principal sacraments necessary from conception to death. By Vrihaspati. The work has been twice printed in Calcutta.

Beginning. सङ्गृह्णीयाः स्त्रुरेष्वेव योगो हयगजादयः ।
हेमराजततास्राद्दिकांस्यपात्राद्यमत्रके ॥
नव मुक्त्यादयः कार्यास्तथैवाभरणादयः ।
गजाश्वशालारम्भश्च तथा तेषु प्रवेशनं ॥

End. (मध्ये अमंलग्नं)। पक्षयोरुभयोरुक्तं पञ्चम्यां पुत्रसिद्धये ।
श्राद्धं नवम्यामस्थानां सिद्धये ग्रन्थिते च तौ ॥

नित्यशाङं पश्चाच्छास्त्रं सर्वसम्पत्समृद्धये ।
त्रयोदश्यां विशेषेण समग्राः सर्वसम्पदः ॥

Colophon. इति श्रीबृहस्पतिसंहिता समाप्ता ।

विषयः । प्रथमाध्यायो नास्ति । २ अध्याये, तिथ्यादिगुणः । ३. दोषलक्षणं । ४, दोषापवादलक्षणं । ५, अङ्कुरार्पणं । ६, मुहूर्त्तविधानं । ७, पुंसवनकर्म । ८, सीमनाकर्म । ९, जातकर्म । १०, नामकरणं । ११, कर्णवेधः । १२, निष्क्रमणं । १३, १४, १५, अन्नप्राशनं । १६, चूड़ाकर्म । १७, उपनयनं । १८, विद्यारम्भादिकालः । १९, व्रतादिकालाकालविधानं । २०, विवाहवधूगृहप्रवेशादिः । २१, राज्यर्द्धविचारः । २२, यात्राकालादिकथनं । २३, प्रातःकालक्रियाविभागः । २४, राजाभिषेचनं । २५, नक्षत्रपुण्यकालक्रियाविधानं । २६, पवित्रारोपणं । २७, शान्तिकालक्रियाविधानं । २८, नानाक्रियासत्कालस्य क्षपिकर्मणश्च विधानं । (अत्र २८ अध्यायात् परमसुलभपत्राणि सन्ति तेनाध्यायनिश्चयो न जायते ।)

No. 1517. रेखाजातकसुधाकरः ।

Substance, country-made paper, 11½ × 6 inches. Folia, 66. Lines, 9—11—12—14 on a page. Extent, 1,500 s'lokas. Character, Nágara. Date Sm. 1931. Place of deposit, Calcutta, Government of India. Appearance, new. Verse. Incorrect.

Rekhájátaka-sudhákara. On certain signs on the body indicative of the future prospects of the person who has them. The first half (*Purvárddha*) of the work is divided into 9 chapters, and treats of 1, three lines on the palm of the right hand; 2, the mode of calculating the year of birth from those lines; 3, ditto the month of do. do.; 4, ditto the demilunation of do. do.; 5, ditto the date of the moon of do. do.; 6, ditto auspicious times for performing particular acts, from ditto; 7, ditto the span of life of do. do.; 8, the peculiar characteristics of a line called Náda; 9, the mode of divining past events in a man's life.—The second half has no division of chapters, it treats of the signs on the persons of women, of men, of kings, of wealthy men, of impotency; of calculating future events from the form of the members of the body; of calculation of longevity from marks on the palms; of marks on the soles of the feet; of toes and fingers; of shoulders and neck; of the teeth, tongue, &c. The name of the author of the work is not given. The work is of considerable repute among astrologers.

Beginning. यन्नामधेयं सकलार्त्तिभञ्जनं यत्कीर्त्तनं वै कलिकल्मषघ्नं ।
यो वै रमानां यशसाञ्च रूपं देवः स पायात् करुणानिधिर्नः ॥ १ ॥
यं देवदेवं मुनिसिद्धसङ्घाः स्तुवन्ति गायन्ति च सामगीतैः ।
तं वन्द आद्यं शशिलेखचूडाविराजितं शम्भुमुमार्द्धदेहं ॥ २ ॥
यज्जातकं व्यासपराशराख्यश्रीसूर्यकात्यायनकाशलेयैः ।
कृतं तदेवाप्यमहं(?) ब्रवीमि युक्तं सुसामुद्रिकयुक्तिभेदैः ॥ ३ ॥
अथ त्रिरेखाध्यायः ।
रेखावशात् कुत्र +जन्मकाले ज्ञानं तथा तत्फलसाधनञ्च ।
वक्ष्ये शिवं भूमिधरेन्द्रकन्याप्रियं नमस्कृत्य गुरुं स्वकञ्च ॥ ४ ॥

End. व्यर्थं लक्षज्ञानं लोके क्षीणायुषां यस्मात् ।
यल्लक्ष पुनः शुभमपि कररेखाप्रभृतिकञ्च ॥
संवदति वाह्याभ्यन्तरमपरं तत्र समुद्रेण निर्द्दिष्टं ॥

Colophon. इति श्रीरेखाजातकसुधाकरः सम्पूर्णतामगमत् ॥

विषयः । प्रथमाध्याये, करान्तगत्रिरेखानिरूपणादिः । २, रेखाद्वारा जन्मकालशाकनिर्णयः । ३, रेखाद्वारा मासनिर्णयः । ४, रेखाद्वारा पक्षनिर्णयः । ५, रेखाद्वारा तिथिनिर्णयः । ६, रेखाद्वारा इष्टकालनिर्णयः । ७, आयुःप्रमाणं । ८, नद्याद्यरेखाफलं । ९, नष्टजातकं । इति पूर्वार्द्धम् ।
इतः परमध्यायनिर्द्देशो नास्ति । स्त्रीदेहचिह्नवर्णनं । पुरुषदेहचिह्नवर्णनं । राजचिह्नवर्णनं । धनिचिह्नवर्णनं । दरिद्रचिह्नवर्णनं । स्त्रीवादिलक्षणं । अङ्गप्रत्यङ्गादिलक्षणद्वारा शुभाशुभफलकथनं । हस्तरेखाद्वारा आयुर्गणनादिः । पुरुषपादतलस्थितध्वजार्धरेखाद्याकाररेखाशुभाशुभफलं । हस्तपदाङ्गुल्यादिलक्षणानि । ग्रीवास्कन्धादिलक्षणानि । दन्तजिह्वातालवादीनां लक्षणानि च ।

No. 1518. बृहद्रिग्विधानं ।

Substance, country-made paper, 11½ × 4¾ inches. Folia, 26. Lines, 9 on a page. Extent, 511 s'lokas. Character, Nágara. Date, Sm. 1930. Copied from a MS. bearing date Sm. 1844. Place of deposit, Calcutta, Government of India. Appearance, new. Verse. Corrected.

Vríhad-rig-vidhána. On reading and reciting the Rig Veda under particular rules and restrictions, and the merits thereof. The rules refer principally to the reciting of the Gáyatrí. Attributed to Saunaka

Acharya. The style of the work is, however, very like that of the Tantras.

Beginning. निष्कृतिर्न हि वेदानां मन्त्राणां कलिदोषतः ।
कलिदोषनिवृत्त्यर्थं गायत्रीमाश्रयेद् द्विजः ॥ १ ॥
गायत्रीमन्त्रसिद्ध्यर्थं गायत्रीत्र्ययुतं जपेत् ।
सर्वेषां वेदमन्त्राणां सिद्ध्यर्थं लक्षकं जपेत ॥ २ ॥

End. अदितिः प्रजपेत्यादं सपिण्डान् भोजयेद्यदि ।
अयुतञ्चेद् ब्रह्मचारी नरकान् मुच्यते तदा ॥ ८२ ॥

Colophon. इति बृहदृग्विधानं समाप्तं ।

विषयः । ऋग्वेदीयानां मन्त्राणां सूक्तानां जपस्य फलम् ।

No. 1519. ऋग्विधानं ।

Substance, country-made paper, $11\frac{1}{2} \times 4\frac{3}{4}$ inches. Folia, 42. Lines, 8 on a page. Extent, 840 slokas. Character, Nágara. Date, Sm. 1931, Copied from a MS. bearing date Sm. 1786. Place of deposit, Calcutta, Government of India. Appearance, new. Verse. Corrected.

Rig-vidhána. On the mode and merits of reciting the hymns of the Rig Veda under certain rules and instructions.—By Saunaka Acharya.

Beginning. ॐ स्वयम्भुवे ब्रह्मणे विश्वगोप्त्रे नमस्कृत्वा मन्त्रदृग्भ्यस्तथैव च ।
विवक्षुरमृग्विधानं पुराणं पुरा दृष्टमृषिभिर्मन्त्रदृग्भिः ॥ १ ॥
मन्त्रेभ्यो मन्त्रदृग्भ्यश्च समाम्नायानुपूर्वशः ।
कर्मणामृषिदृष्टानां विधिं प्रोवाच शौनकः ॥ २ ॥

End. कुले जन्मनि शीले वा प्रज्ञायामुद्यमेऽपि वा ।
ऋग्विधानपरिज्ञानादुशन्ति चरितार्थताम् ॥ ४७ ॥
तुष्यन्ति देवताः सर्वाः सम्पद्यन्ते विभूतयः ।
दुराधयः प्रणश्यन्ति नित्यमृग्विधिपाठिनाम् ॥ ४८ ॥
नमः शौनकाय नमः शौनकाय ॥

Colophon. इति ऋग्विधानं समाप्तम् ।

विषयः । अत्र चत्वारोऽध्यायाः सन्ति । तत्र प्रथमे जपपरिभाषा उक्ता । अनन्तरं सर्वत्रैव ऋग्वेदीयमन्त्रसूक्तानां जपादिफलकीर्त्तनम् ।

No. 1520. भावचिन्तामणिः ।

Substance, country-made paper, $11\frac{3}{4} \times 6$ inches. Folia, 4. Lines, 13 on a page. Extent, 133 s'lokas. Character, Nágara. Date, Sm. 1796. Place of deposit, Calcutta, Government of India. Appearance, new. Verse. Incorrect.

Bháva-chintámaṇi. On expiations for overcoming transcendental causes which prevent the birth of a son. An extract from a Tantra.

Beginning. अथ प्राणिनां पूर्व्वजन्मशापयोतकं । पार्व्वत्युवाच ।

देवदेव जगन्नाथ शूलपाणे वृषध्वज ।

केन योगेन मर्त्यानां बालाख्यं शिशुनाशनं ॥ १ ॥

तत्सर्व्वं यत्र योगीश ब्रूहि मे शशिशेखर ।

शापमोक्षञ्च कृपया प्राणिनामल्पमेधसां ॥ २ ॥

End. लग्नाधिपे गुरौ पुत्रे शनिदृष्टिसमन्विते ।

पुत्रेशे भौमराशिस्थे दत्तपुत्रा भवन्ति हि ॥

Colophon. इति भावचिन्तामणौ पुत्रभावनिरूपणाध्यायो नाम षष्ठः पटलः समाप्तेयं सन्तान-दीपिका ॥

विषयः । अत्र पुत्रानुत्पत्तिप्रतिबन्धकशापमोचनकथनं, पुत्रोत्पादकग्रहयोगकथनञ्च ।

No. 1521. सामान्यसूत्रं ।

Substance, country-made paper, 7×3 inches. Folia, 4. Lines, 8—10 on a page. Extent, 80 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Corrected.

Sámánya Sútra. The first chapter of the A'pastamba-kálpa-sútra —on technical terms of the Bráhmanic liturgy.

Beginning. यज्ञं व्याख्यास्यामः त्र त्रयाणां वर्णानां ब्राह्मणराजन्ययोः वैश्यस्य च त्रिभिर्वेदै-र्विधीयते ।

End. कर्म्मणि लौकिकः सम्पद्यते । यथा समारूढे ॥

Colophon. इति सामान्यसूत्रं ।

विषयः । यज्ञव्याख्यानं ।

No. 1522. वादरायणप्रश्नः, सटीकः ।

Substance, country-made paper, $11\frac{3}{4} \times 6$ inches. Folia, 12. Lines, 10—11—12 on a page. Extent, 350 s'lokas. Character, Nágara. Date, Sm. 1931. Place of deposit, Calcutta, Government of India. Appearance, new. Prose and verse. Incorrect.

Vádaráyaṇa-prasna. On the span of animal life and on divination by means of putting questions to persons whose future life has to be foretold. By Vádaráyaṇa who does not appear to be the same with Vyása. Attached to the text is a commentary by Bhaṭṭotpala.

Beginning. (मू०) । पूर्व्वं परीक्ष्यमन्यत् पश्चात् शुभाशुभं पुंसां ।
जगदभ्युद्य तमखिलं करोति किं प्राप्तकालस्य ॥
(टी०) । केशाजार्कनिशाकरक्षितिजविज्जीवा + + सूर्य्यजान्
विघ्नेशं स्वगुरुं प्रणम्य शिरसा देवीञ्च वागीश्वरीं
प्रश्नेऽस्मिन् मुनिवादरायणकृते स्वार्थसम्पत्तये
शिष्याणां हितकाम्यया द्विजवरष्टीकां करोत्युत्पलः ॥

End. (मू०) । लग्नैकादशमे पापैः पृच्छकस्य धनं भवेत ।
तिष्ठति शुभसहितश्चेत् तदापि वृद्धिं वदेन्महतां ॥ ३६ ॥

Colophon. इति श्रीवादरायणप्रश्नविद्या समाप्ता ।
(टी०) । चिन्तामणीति विख्याता टीकयं शास्त्रवल्लभा ।
अनुष्टुभांशजीन्यस्याः(?) मच्छमाम(?)मुदीरितं ॥ ४ ॥
इति उत्पलाचार्य्यविरचिता वादरायणप्रश्नटीका समाप्ता ।

विषयः । अत्र प्रथमं मनुष्यगोमहिषादीनां आयुःमत्त्वाकथनं । ततः प्रश्नगणनया लाभालाभसुखदुःखजयपराजयजीवितमरणादिज्ञानकथनं ।

No. 1523. उपदेशसूत्रविवृतिः ।

Substance, country-made paper, $11\frac{3}{4} \times 6$ inches. Folia, 36. Lines, 10—11 on a page. Extent, 1,000 s'lokas. Character, Nágara. Date, Sm. 1939. Place of deposit, Calcutta, Government of India. Appearance, new. Prose and verse. Incorrect.

Upades'a-sútra-vivṛiti. A commentary on the Upades'a Sútra—a treatise on casting nativities and horoscopes, attributed to Jaimini. The commentator's name is not given.

Beginning. पूर्व्वाचार्य्यं नमस्कृत्य जैमिनेः सौत्रजातके ।
आयुर्दायोदाहरणं कुर्व्वे बालोपकारकं ॥ १ ॥
अथ श्रीमज्जैमिनिजातकानुसारेणायुर्दायादिफलविचारः क्रियते ।

End. लेपलाभपदस्थले भूतं सम्पन्नं तत एव सर्व्वमपि विचारणायेति दिक् ।

Colophon. इत्युपदेशसूत्रे जैमिनीये तृतीयपादवृत्तिः ।

विषयः । अत्र जैमिनिजातकगणनानुसारेण बालकस्य आयुर्दायायुदाहरणं

No. 1524. कर्म्मप्रकाशवृत्तिः ।

Substance, country-made paper, $11\frac{3}{4} \times 6$ inches. Folia, 32. Lines, 10—11 on a page. Extent, 775 s'lokas. Character, Nágara. Date, Sm. 1931. Place of deposit, Calcutta, Government of India. Appearance, new. Prose and verse. Incorrect.

Karma-prakás'a-vritti. On astrological rules for casting nativities, divination, &c., &c. The MS. is incomplete, and the author's name does not appear. The codex comprises twenty chapters.

Beginning. उद्यत्कोटिदिवाकरद्युतिनिभं रक्ताङ्गरागांशुकं
हस्ते मेदकपाशमङ्कुशधरं वीणात्मगीःसंयुतं ।
ब्रह्मेन्द्रप्रमुखैश्च किन्नरगणैः सिद्धैश्च विद्याधरैः
सेव्यं सत सुखदं गजेन्द्रवदनं वाक्सिद्धिदं तं भजे ॥ १ ॥
गिरीशं दिनेशं गिरं विष्णुरामं गुरुं खिन्दिकं रोमकाचार्य्यवर्य्यान् ।
प्रणम्याथ कर्म्मप्रकाशस्य वृत्तिं करोमीह बालावबोधाय सम्यक् ॥ २ ॥
नत्वा गिरं गणपतिं ग्रहवर्गमुख्यं तं कर्म्मसाक्षिणमलक्ष्यगुणं गुरुञ्च ।
श्रीखिन्दिकोक्तगुरुताजिकतन्त्रदीपात् कर्म्मप्रकाशमनुदीपकमुद्गिरामि ॥ ३ ॥

End. पर्व्वान्तलग्नाच्च विलोमवृत्त्या यत् स्यात् विलग्नं जनिलग्नमेतत् ।

Colophon. समाप्तिसूचकवाक्यं नास्ति ।

विषयः । अत्र विंशत्यध्यायाः । १मे, राश्यधिकारः । २ये, ग्रहाधिकारः । ३ये, षोड़श-योगाधिकारः । ४र्थे, द्वाचिंशत्सहजभावाधिकारः । ५मे, निषेककालाधिकारः । ६ष्ठे, अरिष्टादिकथनं । ७मे, जीवननिर्णयः । ८, शरीरनिर्णयः । ९मे, जन्म-दिवसस्य गणनं । १०मे, दशाधिकारः । ११शे, धनाधिकारः । १२शे, शरीर-दोषाधिकारः । १३शे, प्रकृत्यधिकारः, अर्थात् परदारादियोगकथनं । १४शे,

प्रत्ययाधिकारः, अर्थात् ग्रहाणां केन्द्रस्थानादिस्थितौ शुभाशुभकथनं । १५शे, कर्म्माधिकारः । १६शे, दरिद्रयोगकथनं । १७शे, सहजाधिकारः । १८शे, पितृमात्रधिकारः । १९शे, स्त्रीजातकाधिकारः । २०शे, प्रकीर्णाधिकारः ।

No. 1525. जटापटलदीपिका ।

Substance, country-made paper, 8½ × 3½ inches. Folia, 24. Lines, 7 on a page. Extent, 420 s'lokas. Character, Nágara. Date. ? Place of deposit, Calcutta, Dr. Rájendralála Mitra. Appearance, new. Prose. Incorrect.

Jaṭápáṭala-dípiká. A commentary on the Jaṭápáṭala, a work on the various mystical modes of writing and reading the hymns of the Rig Veda according to the rules of Hayagríva. (*Vide* No. 1234.) By Dayásaṅkara, son of Dharanídhara Vyávahárika.

Beginning. अपारसंसारसमुद्रमग्नस्वभक्तजन्तूद्धरणे दयालुः ।
धृतैकदीक्षः पुरतस्तनोतु शिवः शिवं मे शिवया समेतः ॥ १ ॥
यस्यानुग्रहवशतोऽच्युतादिदेवाः संसिद्धिं विबुधवरोचितां प्रयाताः ।
भारत्याः कुवलयपत्रलोचनाया भूत्यै स प्रभवतु मे कृपाकटाक्षः ॥ २ ॥
नत्वा भाष्यकृतः पूर्व्वान् जटापटलदीपिकां ।
तनोमि विदुषां प्रीत्यै हयग्रीवमतानुगां ॥ ३ ॥

End. परायातमात्सर्य्यदोषाः कवीन्द्राः कृतिं वीक्ष्य मे सप्रमोदा भवेयुः ।
खलास्योपहासं विधायाथ बाला अवाप्यापि सम्यक् जटाया रहस्यं ॥

Colophon. इति श्रीव्यावहारिकोपनामकधरणीधरसूनुना दयाशङ्करेण कृता जटापटलव्याख्या दीपिकाख्या समाप्तिमगात् ॥

विषयः । जटापटलस्य व्याख्यानम् ।

No. 1526. काव्यप्रकाशादर्शः, वा काव्यप्रकाशटीका ।

Substance, country-made yellow paper, 21 × 3½ inches. Folia, 103. Lines, 9—10 on a page. Extent, 1,824 s'lokas. Character, Bengali. Date, Sk. 1777. Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Correct.

Kávya-prakás'ádars'a. A commentary on the Kávya-prakás'a,—a treatise on rhetoric. By Mahes'vara Nyáyálaṅkára.

Beginning. मुखैश्चतुर्भिः स्तुवते विधाचे स्तोत्रे स्तुतीनाञ्च चतुष्टयाय ।
भुजैश्चतुर्भिश्चतुरोऽर्थवर्गान्नमो ददानाय चतुर्भुजाय ॥
दुर्व्याख्याजनितप्रमोहशमनी वैषम्यविध्वंसिनी
वैषम्यादतिरोचनी रसखनी काव्यार्गलोद्घाटिनी ।
टीका विज्ञजनप्रमोदजननी भावार्थचिन्तामनी
भट्टाचार्य्यमहेश्वरेण रचिता काव्यप्रकाशोपरि ॥

End. इदानीमेषां दोषाद् यथायोगमिति । कारिकार्थमुपसंहृत्य दर्शयति तदेते इति ।

Colophon. इति श्रीमहेश्वरन्यायालङ्कारभट्टाचार्य्यकृते काव्यप्रकाशादर्शे दशमोऽर्थालङ्कार-प्रतिबिम्बः । समाप्तश्चायं ग्रन्थः ।

विषयः । काव्यप्रकाशस्य व्याख्यानं ।

No. 1527. काव्यप्रकाशटीका ।

Substance, country-made yellow paper, 17 × 3 inches. Folia, 58. Lines, 6 on a page. Extent, 1,966 s'lokas. Character, Bengali. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Correct.

Kávyaprakás'a-ṭíká. A commentary on the Kávyaprakás'a. By Gadádhara Chakravartti Bhaṭṭáchárya. The codex is a mere fragment.

Beginning. ग्रन्थारम्भे कर्त्तव्ये इति शेषः । तेन ग्रन्थारम्भपूर्व्वकाले परामृशतीति लभ्यते ।

End. अभेदे विषयविषयिभावरूपसम्बन्धासम्भवादत आह स्वाकार इवाभिन्नोऽपीति
(इतः खण्डितं ।)

विषयः । काव्यप्रकाशस्य व्याख्यानं ।

No. 1528. यजुर्वेदिकुशण्डिका ।

Substance, country-made yellow paper, 17 × 3¾ inches. Folia, 7. Lines, 8 on a page. Extent, 196 s'lokas. Character, Bengali. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Correct.

Yajurvedi-kushaṇḍikā. A manual for the performance of the fire sacrifice as a part of the nuptial ceremony, according to the canons of the Yajur Veda. By Pas'upati Bhaṭṭa. The author was a minister of Lakshmaṇa Sena of Gaur, and flourished in the beginning of the twelfth century.

Beginning. अथ यजुर्वेदिनां दशकर्म्मपद्धतिर्लिख्यते । तत्रादौ होमकुशण्डिका ।

End. इतिमन्त्रेण तिलकं दद्यात् ।

Colophon. इति यजुर्वेदिकुशण्डिका समाप्ता ।

विषयः । यजुर्वेदोक्तं वह्निस्थापनविधानं ।

No. 1529. स्तवमाला ।

Substance, country-made paper, 10½ × 4½ inches. Folia, 40. Lines, 15—18 on a page. Extent, 2,300 s'lokas. Character, Bengali. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Verse. Incorrect.

Stava-málá. A series of hymns in praise of Kṛishṇa and Rádhá. By Rúpa Gos'vámí, one of the associates of Chaitanya.

Beginning. श्रीमदीश्वररूपेण रसामृतकृताकृता ।
स्तवमालानुजीवेन जीवेन समगृह्यत ॥
पूर्व्वं चैतन्यदेवस्य कृष्णदेवस्य तत् परं ।
श्रीराधायास्ततः कृष्णराधयोर्लिख्यते स्तवः ।

End. इति श्रीकृष्णनामस्तोत्रं समाप्तं ।

Colophon. इति श्रीरूपगोस्वामिना कृता स्तवमाला समाप्ता ।

विषयः । कृष्णराधिकयोः स्तुतिकथनं ।

No. 1530. वर्षकौमुदी ।

Substance, country-made yellow paper, 23 × 4¼ inches. Folia, 151. Lines, 8—9 on a page. Extent, 5,738 s'lokas. Character, Bengali. Date, Sk. 1766. Place of deposit, Calcutta, Government of India. Appearance, old. Prose and verse. Incorrect.

Varsha-kaumudí. A liturgical calendar, describing the various religious duties enjoined for each day of a lunar year. By Govindánanda Áchárya.

Beginning. चिन्ताग्नीयति धातरि व्रजवधूचित्तेषु पाशीयति
श्रीवाजिम्लवति(?) प्रसादविहितग्रामाम्बुजन्मीयति ।
यन्नेत्राञ्जनचातुरी जलधिजा वक्त्राम्बुजेऽलीयति
क्षौणीभारहराय यादवकुलोत्तंसाय तस्मै नमः ॥
धुनोतु ध्वान्तमस्माकमन्तश्चिन्ताभिसम्भृतं ।
गोविन्दवदनोद्गत्याञ्चजन्यजयध्वनिः ॥
येनाद्यातिष(?)पक्षजेषु नितरां मार्त्तण्डविद्दायितुं (?)
श्रीगोविन्दपदारविन्दयुगलैर्नलामबालायितं (?) ।
वेदान्तस्मृतिमन्तत्रिपथगोन्मेषे हि मात्रीयितं
केषां नोपविशीलितो गणपतिर्भट्टः सतां दृग्विधः ॥
तत्तनुजन्मा विदुषामसुरागमघूनिकाभिवामिक्तः ।
मधुरिपुपदारविन्दश्रद्धामृतमाधुरीरसाभिज्ञः ॥
आलोच्याखिलमङ्गलानविकलं दृष्ट्वा पुराणान्यपि
प्रोक्ताः सम्यग् गाथा विविच्य मुनिभिः + + + + संहिता ।
श्रीमत्तातपदारविन्दविलसत् + लीभवोद्देशतः
श्रीगोविन्दकविः करोति ललितां वर्षक्रियाकौमुदीं ॥

End. सर्व्वान्तर्यामिने तस्मै गोविन्दाय नमो नमः ।
यत्कृपा विदुषामस्यामनुरागप्रवर्त्तिनी ॥ १ ॥

Colophon. इति श्रीगोविन्दानन्दाचार्य्यकृता वर्षकौमुदी समाप्ता ।

विषयः । प्रथमं तिथिनिरूपणं । ततः तिथ्योर्युग्मकथनं । उभयदिने तिथिलाभे शुक्लकृष्णभेदेन व्यवस्थानिरूपणं । प्रतिपदादिपञ्चदशतिथिकृत्यकथनञ्च । ततो ग्रहणे पारणव्यवस्थाकथनं । ग्रहणकर्त्तव्यकर्म्मनिरूपणञ्च । ततो गोविन्दादिदेवतापूजाविधिकथनं । ततः सङ्क्रान्तिविवेचनं, सङ्क्रान्तिव्रतकथनञ्च । ततो मासपदार्थनिरूपणं । ततः पक्षपदार्थनिरूपणं । ततो वैशाखादिद्वादशमासकृत्यनिरूपणं । ततो गङ्गातुलसीशालग्रामानां माहात्म्यकथनं । ततः सूतिकाषष्ठीपूजाविधिप्रयोगकथनं । ततो मङ्गलचण्डिकापूजाविधिप्रयोगकथनं । ततो जन्मतिथिकृत्यं, अनध्यायकथनञ्च । ततः शूद्रानां विधवानां पतिव्रतानाञ्च धर्म्मकथनं ॥

No. 1531. विधिवादटीका ।

Substance, country-made yellow paper, 19½ × 3½ inches. Folia, 32. Lines, 8—9 on a page. Extent, 1,312 s'lokas. Character, Bengali. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Corrected.

Vidhiváda-ṭíká. A commentary on Gaṅges'a's chapter on religious injunction, in the Śabdakhaṇḍa of his Chintámaṇi. By Mathuránátha Tarkavágís'a.

Beginning. उच्छन्नप्रच्छन्नग्रन्थे वेदस्याचारमूलकत्वनिरूपणानन्तरं प्रवर्त्तकज्ञानं निरूपयितुं प्रवर्त्तकज्ञाने आचारमूलत्वस्य उपपादकत्वरूपोपोद्घातमङ्गतिं दर्शयन् शिष्यावधानाय प्रतिजानीते आचारेति ।

End. पाकादावनागतपाकादौ सिद्धासिद्धेति उक्तं इतः परं खण्डितं ।

विषयः । गङ्गेशोपाध्यायकृतविधिवादस्य व्याख्यानं ।

No. 1532. भाषारत्नं ।

Substance, country-made yellow paper, 18 × 4 inches. Folia, 53. Lines, 5—6—7 on a page. Extent, 1,784 s'lokas. Character, Bengali. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old Prose. Incorrect.

Bháshá-ratna. An elementary treatise on the seven categories of the Mímáṅsá. By Kanáda Tarkavágís'a Bhaṭṭáchárya.

Beginning. चूड़ामणिपदाम्भोजभ्रमरीभूतमौलिना ।
सङ्क्षिप्य श्रीकणादेन भाषारत्नं वितन्यते ॥

End. यथा गङ्गायां घोष इत्यादौ तीरे संयोगरूपः शक्त्या प्रवाहसम्बन्ध इति सङ्क्षेपः।

Colophon. इति श्रीकणादतर्कवागीशभट्टाचार्य्यविरचितं भाषारत्नं समाप्तम् ।

विषयः । वैशेषिकमतसिद्धद्रव्यगुणकर्म्मसामान्यविशेषसमवायाभावात्मकसप्तपदार्थनिरूपणं ।

No. 1533. रामलीलामृतं, चतुर्थसर्गमात्रं ।

Substance, country-made paper, 16 × 3½ inches. Folia, 10. Lines, 5 on a page. Extent, 162 s'lokas. Character, Bengali. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Verse. Incorrect.

Rámalílámṛita. A poem on the career of Ráma. By Krishṇamohana. The codex contains only a part of the fourth book.

Beginning. योषा वक्षसि मस्तके च नियतं योऽप्यर्द्धनारीमयः
शक्त्यालिङ्गितलिङ्गपूजनमहानन्दोऽपि कामान्तकः ।
तत्रैकाजिरतापरा(?) त्रिपथगा तत्सङ्गतायाम्बता(?)
दाता पूज्यतमो विचित्रचरितो भीमोत्यसीमोवतात् ॥

End. ० ० ०

Colophon. इति श्रीकृष्णमोहनकृतश्रीरामलीलामृते चतुर्थः सर्गः ।

विषयः । रामलीलावर्णनं ॥

No. 1534. रामलीलामृतक्रमदीपिका, वा रामलीलामृतटीका चतुर्थसर्गीया ।

Substance, country-made yellow paper, 16 × 3½ inches. Folia, 13. Lines, 6—10 on a page. Extent, 584 s'lokas. Character, Bengali. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Incorrect.

Rámalílámṛita-krama-dípiká. A commentary on the last named work, by the author himself. Like the text, the commentary comprises only the fourth book.

Beginning. इह सर्गे चित्रकाव्यविवक्षया श्रीमहादेवचरितस्य चित्रत्वं कीर्त्तयन् मङ्गलमाचरति शक्त्या इत्यादिः ।

End. ० ० ०

Colophon. इति श्रीकृष्णमोहनकृतश्रीरामलीलामृतक्रमदीपिकानामकटीकायां चतुर्थः सर्गः ।

विषयः । रामलीलामृतस्य व्याख्यानं ।

No. 1535. दशश्लोकी ।

Substance, country-made yellow paper, 13½ × 3 inches. Folium, 1. Lines, 7. Extent, 10 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Verse. Incorrect.

Das'a-s'loki. Ten stanzas on the essence of the Vedánta doctrine. By S'ankara Áchárya. Mr. Hall takes *Das'a-s'loki* to be the name of the text, and *Siddhántavindu* to be the name of a commentary on it by Madhusúdana Sarasvatí, (*Contributions*, p. 108); but the MS. before me denies this, and takes the latter to be the name of the text, and at first sight, it appears to be correct. The former, meaning simply "ten stanzas," can scarcely be the original name of a poetical work, and *Siddhánta-vindu*, or "conclusion in a drop," would be a very appropriate poetical designation for a work which in the space of ten stanzas gives the substance of the Vedánta philosophy. In the codex of the commentary belonging to the Sanskrit College of Calcutta, it is, however, distinctly mentioned that S'ankara wrote the *Das'a-s'loki* (श्रीशङ्करो दशश्लोकीं प्रणिनाय्य । अतः प्रत्ययस्यालम्बनविशेषनिर्णयाय आह भगवान् आचार्य्यः नभूमिरिति ।) and Madhusúdana was the author of the commentary. Its colophon says, "this is the end of the work named Siddhánta-vindu, composed by Madhusúdana Sarasvatí." (इति श्रीमधुसूदनसरस्वतीविरचितः सिद्धान्तविन्दुनामग्रन्थः समाप्तः) Pandit Táránátha Váchaspatí published an abstract of the commentary under the name of Siddhánta-vindusára. Brahmánanda Sarasvatí is the author of a second commentary on the text.

Beginning. न भूमिर्न तोयं न तेजो न वायुर्न खं नेन्द्रियं वा न तेषां समूहः ।
अनैकान्तिकत्वात् सुषुप्तैकसिद्धस्तदेकोऽवशिष्टः शिवः केवलोऽहं ॥

End. न शून्यं न चाशून्यमद्वैतकत्वात् कथं सर्व्ववेदान्तसिद्धं ब्रवीमि ।

Colophon. इति श्रीमच्छङ्कराचार्य्यविरचितं सिद्धान्तविन्दु समाप्तम् ।

विषयः । दशभिः श्लोकैः पृथिव्यादिपदार्थानां मिथ्यात्वव्यवस्थापनपूर्व्वकं परमात्मनः सत्यत्वव्यवस्थापनं ।

No. 1536. अभिषेकपद्धतिः ।

Substance, country-made yellow paper, 15 × $2\frac{3}{4}$ inches. Folia, 6. Lines, 8 on a page. Extent, 171 s'lokas. Character, Bengali. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Incorrect.

Abhisheka-paddhati. A manual for the consecration of S'ákta divinities and the ordination of S'ákta neophytes. Anonymous.

Beginning. (प्रथमपत्रं नास्ति ।)

End. कृतार्थमात्मानं मन्यमानो माटकाः साधकांश्च सन्तोष्य विसृज्याच्छिद्रावधारण-वचनं कुर्य्यात् ।

Colophon. इत्यभिषेकपद्धतिः ।

विषयः । अत्र प्रथमं मालामंस्कारः । ततः कवचसंस्कारः । ततः शाक्ताभिषेककथनं । ततः पूर्णाभिषेककथनं ।

No. 1537. शक्तिवादः ।

Substance, country-made paper, 17 × 3 inches. Folia, 15. Lines, 7 on page. Extent, 841 s'lokas. Character, Bengali. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Correct.

S'aktiváda alias *S'aktivichára.* A philosophical disquisition on the powers of words, or the relation between their sounds and senses. The MS. is incomplete, and the author's name does not occur in it; but the name is Gadádhara Nyáyasiddhántavágís'a Bhaṭṭáchárya. Hall's *Contributions*, p. 56.

Beginning. शक्तिलक्षणे पदवृत्ती वृत्त्या पदप्रतिपाद्य एव पदार्थः इत्यभिधीयते तत्र शक्तिविषयो वाच्यः, स एव पदार्थो मुख्यार्थः अथ केयं शक्तिः अत्र नैयायिकाः अस्माच्छब्दादयमर्थो बोद्धव्य इति परमेश्वरशङ्केतः शक्तिः ।

End. इदन्तु तत्त्वं अहं पण्डित इति जानाति इत्युवाच इत्यादिस्थले । इतः परं खण्डितं ।

विषयः । पदानां अस्माच्छब्दादयमर्थो बोद्धव्य इतीश्वरशङ्केतरूपशक्तिनिरूपणं ।

No. 1538. अपूर्व्ववादरहस्यं ।

Substance, country-made paper, 16 × 2½ inches. Folia, 29. Lines, 7 on a page. Extent, 989 s'lokas. Character, Bengali. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Correct.

Apurva-váda-rahasya. A commentary on the chapter on the use of the imperative mood in Vedic injunctions and the rewards of religious rites in the *S'abda Khaṇḍa* of the *Chintámaṇi* of Gaṅges'a. By Raghunátha Siromaṇí. Mr. Hall apparently takes the Apurva-váda to be an independent work on the moral relation of cause and effect. *Contributions*, p. 190.

Beginning. प्रथमं दशपत्राणि न सन्ति ।

End. यथा विश्वजिता यजेतेत्यादाविति ।

Colophon. इति शब्दपरिच्छेदरहस्ये अपूर्व्ववादरहस्यं समाप्तं ।

विषयः । गङ्गेशोपाध्यायकृतापूर्व्ववादस्य व्याख्यानं ।

No. 1539. शुद्ध्यादिसङ्ग्रहः ।

Substance, country-made yellow paper, $16\frac{3}{4} \times 3$ inches. Folia. 115. Lines, 6 on a page. Extent, 3,924 s'lokas. Character. Bengali. Date, Sk. 1733. Place of deposit, Calcutta, Government of India. Appearance, old. Prose and verse. Incorrect.

S'uddh-yádi-saṅgraha. A compilation on purification, mourning and S'ráddha. Anonymous.

Beginning. व्रजशिशुचन्द्रवयस्यं सततमुपास्यं विरिञ्चाद्यैः ।

वेदविदितरहस्यं गिरीशनमस्यं नमस्यामः ॥

अथ शुद्धिव्यवस्थायां सङ्क्षेपः ।

End. वाग्दत्तायाः कन्यायाः कुमारीवद्विवाहः ।

Colophon. इति श्रीमतां सङ्क्षेपः ।

विषयः । प्रथमं शुद्धिव्यवस्थाकथनं । ततः श्राद्धव्यवस्थाकथनं । ततः तिथिव्यवस्थाकथनं । ततः प्रायश्चित्तव्यवस्थाकथनं । तत उद्वाहव्यवस्थाकथनं ।

No. 1540. सेतुसङ्ग्रहः ।

Substance, country-made yellow paper, $17\frac{3}{4} \times 5\frac{1}{2}$ inches. Folia, 300. Lines, 8—9 on a page. Extent, 10,200 s'lokas. Character, Bengali. Date, Sk. 1766. Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Incorrect.

Setu-saṅgraha. Annotations on the Mugdhabodha grammar of Vopadeva. By Gaṅgádhara, son of S'ivaprasáda Tarkapanchánana of Kumárahaṭṭa near Calcutta.

Beginning. गङ्गाधरः शिवं नत्वा कुरुते सेतुसङ्ग्रहं ।

दुर्गम्यमुग्धबोधाख्यसरित्सन्तरणार्थिनां ॥

End. ब्रह्मशब्दो मङ्गलार्थः तथा च आदावन्ते च मध्ये च मङ्गलाचरणं स्मृतं ।

Colophon. इति कुमारनिवासिश्रीलशिवप्रसादतर्कपञ्चाननात्मजगङ्गाधरकृतदुर्गम्यमुग्धबोधाख्यसरित्सन्तरणहेतुसेतुसङ्ग्रहे इष्टादिपदः । इति कृदन्ताध्यायः ॥

विषयः । मुग्धबोधव्याकरणस्य व्याख्यानं ।

No. 1541. आख्यातविचारः ।

Substance, country-made yellow paper, 21 × 3½ inches. Folia, 16. Lines, 8 on a page. Extent, 760 s'lokas. Character, Bengali. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Incorrect.

Ákhyáta-vichára. A philosophical disquisition on conjugation. By Gadádhara Bhaṭṭáchárya.

Beginning. धातुप्रकृतिकाश्च लकारकृत्सन् यङ्निच्प्रभृतयः केचिद्धात्वर्थान्वितमधिकार्थं ब्रुवते ।

End. तस्य विध्यर्थत्वे तत्तात्पर्य्येणाधुनिकानां न भुञ्जीतेत्यादिप्रयोगापत्तिरिति दिक् ।

Colophon. इति महामहोपाध्यायश्रीगदाधरभट्टाचार्य्यकृतआख्यातविचारः समाप्तः ।

विषयः । आख्यातशक्तिनिरूपणं ।

No. 1542. अनुमित्यादिबाधान्तटीका ।

Substance, country-made yellow paper, 19 × 3½ inches. Folia, 336. Lines, 8—9—10—11 on a page. Extent, 15,890 s'lokas. Character, Bengali. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Correct.

Anumityádi-bádhánanta-ṭíká. A commentary on a portion of the Anumána Khaṇḍa of Gaṅges'a. By Jagadís'a Nyáyapanchánana.

Beginning. सस्मितानननसरोजमङ्गने रिङ्गमानमतिलोलकुण्डलं ।
रोचनोज्ज्वसितभालमस्तु मे कैशवं शैशवं वपुः ॥
प्राचैरनुचितविविधचोद्यैः कलुषीकृतोऽप्यधुना
दीधितियुतमणिरेषः श्रीजगदीशप्रकाशितः स्फुरतु ।

End. तत्तद्धर्म्मावच्छिन्नप्रतियोगिताकाभावनिश्चयत्वेन समानप्रकारकतया तथात्वं तत्तद्व्यक्तिमात्रवृत्त्यनन्तधर्म्मान्तर्भावेनानन्तहेतुत्वकल्पः । पुस्तकमिदं सम्पूर्णप्रायं ।

विषयः । अनुमित्यादिबाधान्तदीधितिव्याख्यानं ।

No. 1543. न्यायवार्त्तिकतात्पर्य्यटीका ।

Substance, country-made paper, $13\frac{3}{4} \times 5\frac{1}{2}$ inches. Folia, 99. Lines, 10 on a page. Extent, 2,138 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, new. Prose. Incorrect.

Nyáya-vártika-tátparya-ṭíká. A commentary on the Nyáya-vártika of Udyotakara. By Váchaspati Mís'ra, disciple of Martanda-tilaka Svámin. Hall's *Contributions*, p. 21.

Beginning. परीक्षानन्तरमुपदेशक्रमानुरोधेन प्रवृत्तिः । परीक्षितुं युक्ता मा कस्मान्न परीक्ष्यत इति शङ्कानिराकरणाय सूत्रमित्याह । मनसोऽनन्तरेति ।

End. कराः कृतोऽञ्जलिरयं बलिरेष दत्तः कायो मणाप्रहतात्र(?) यथाभिलाषम् ।
अभ्यर्थये वितथनप्रपयांश्च(?) वर्षे मा माविलीकुरुत कीर्त्तिनदीः परेषाम् ॥

Colophon. इति मिश्रश्रीवाचस्पतिविरचितायां न्यायवार्त्तिकतात्पर्य्यटीकायां पञ्चमोऽध्यायः समाप्तः ॥

विषयः । उद्योतकरविरचितन्यायवार्त्तिकतात्पर्य्यग्रन्थव्याख्यानं ।

No. 1544. शब्दशक्तिप्रकाशिकाप्रबोधिनी ।

Substance, country-made paper, $16 \times 4\frac{1}{4}$ inches. Folia, 33. Lines, 10 on a page. Extent, 1,237 s'lokas. Character, Bengali. Date, Sk. 1754. Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Generally correct.

S'abdas'akti-prakás'iká-prabodhiní. A commentary on the S'abdas'akti prakás'iká of Jagadís'a Tarkálankára. By Rámabhadra Siddhánta vágís'a. Hall's *Contributions*, p. 55.

Beginning. विश्वतात जगन्मातरेवं गौरीगिरीशयोः ।
मिथः सम्भाषया स्मेरं हेरम्बं समुपास्महे ॥
गुरुमिव गुरुमिह नत्वा तत्कृतशक्तिप्रकाशेषु ।
श्रीरामभद्रकृती कुरुते टीकां मुदे सुधियः ॥
शब्दशक्तीति । शब्दस्य शक्तिर्बाधसामर्थ्यं तत्प्रकाशिकेत्यर्थः ।

End. इत्यादौ चाभावस्य संशयकोटितयानुभवस्य बाधितत्वादित्याशयेनाऽऽहुरित्युक्ताऽखरसो व्यञ्जितः ।

Colophon. इत्यन्तं प्रचरन्ती शब्दशक्तिप्रकाशिकाप्रबोधिनी श्रीरामभद्रसिद्धान्तवागीशविरचिता । श्रीविष्णुचरणाब्जे तु मनोऽलिर्मेऽस्तु नित्यशः ॥

विषयः । शब्दशक्तिप्रकाशिकाव्याख्यानं ।

No. 1545. चिन्तामणिप्रकाशः । प्रत्यक्षखण्डः ।

Substance, country-made paper, 8 × 3 inches. Folia, 153. Lines, 12—13—14 on a page. Extent, 9,446 s'lokas. Character, Nágara. Date, Sk. 1633. Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Correct.

Chintámaṇi-prakás'a. A commentary on the *Chintámaṇi* of *Gaṅges'a.* By Ruchidatta Mahámahopádhyáya. The MS. is incomplete and limited to the *Pratyaksha Khaṇḍa.* This work is distinct from Jayadeva's *Maṇyáloka* which has the alternative title of Chintámaṇi-prakás'a.

Beginning. क्षणोत्तरच्छदपटार्द्धकृतान्तरालमुत्तालनिश्चमितनुन्नपयोधरायं ।

इन्दो स्फुटागमि विभिन्नतनोस्तनोतु सुप्तं रुषा शयनसीम्नि शिवं शिवायाः ॥

अधीत्य रुचिदत्तेन जयदेवाज्जगद्गुरोः ।

चिन्तामणौ मन्यमणौ प्रकाशोऽयं प्रकाश्यते ॥

प्रारिप्सितविघ्नविनाशाय कृतं मनस्कारं शिष्यान् शिक्षयितुमादौ निबध्नाति ।

गुणातीत इति ।

End. प्रस्तुतेति—पदात् पदार्थस्मरणं प्रस्तुतवत्ताकमेति तत्र तत्रोल्लेखिस्मरणाभिप्रायेणैवाङ्गरिति । श्रीः ।

Colophon. इति श्रीमहामहोपाध्यायरुचिदत्तविरचितचिन्तामणिप्रत्यक्षखण्डप्रकाशः समाप्तः ।

सोदरनगरनिवासी रुचिदत्तः सूरिमूर्द्धन्यः ।

चिन्तामणिप्रकाशं व्यरचयदान्वीक्षिकीकोशं ॥

शके १६३३ । आश्विने मासि ।

विषयः । गङ्गेशोपाध्यायकृतचिन्तामणिप्रत्यक्षखण्डस्य व्याख्यानं ।

No. 1546. चिन्तामणिप्रकाशः, अनुमानखण्डः ।

Substance, country-made paper, 8 × 3 inches. Folia, 148. Lines, 12 on a page. Extent, 4,301 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Correct.

Chintámaṇi-prakás'a. The first volume of the work noticed under the last preceding No. It explains the Anumána Khaṇḍa of Ganges'a.

Beginning. प्रणयकलहकेलिभीषणं भीतिहेतोः प्रकटयति समन्तान्मायया कायमस्मिन् ।
सभयमथ भवान्या गाढमालिङ्गमानो घटयतु घनविघ्नध्वंसमस्माकमीशः ॥
निशम्य सकलं शास्त्रं नानागुरुमुखाम्बुजात् ।
अनुमानप्रकाशोऽयं रुचिदत्तेन तन्यते ॥
सङ्गतिं दर्शयन्नेव शिष्यावधानार्थमिदानीमनुमाननिरूपणं क्रियते,—इति प्रतिजानीते,—प्रत्यक्षेति ।

End. ईश्वरोपगृहीतशरीरस्य कारणत्वादिति भावः। असिद्धेरिति, अप्रसिद्धेरित्यर्थः। अन्यहेतुमाह, अदृष्टेति । तथा च सर्व्वासङ्गह इति भावः। वाद्यन्तरमतं दूषयति, नापीति। द्वितीयक्षणे दोषमाह घटादेरिति अतः खण्डितत्वात् परिशेषवाक्यं नास्ति ।

विषयः । गङ्गेशोपाध्यायकृतचिन्तामण्यनुमानखण्डस्य ईश्वरानुमानप्रकरणं यावद् व्याख्यानं ।

No. 1547. प्रत्यक्षमणिदीधितिव्याख्याविवेचनं ।

Substance, country-made paper, 10 × 4 inches. Folia, 126. Lines, 8—9 on a page. Extent, 2,687 s'lokas. Character, Nágara. Date, Sm. 1670. Place of deposit, Calcutta, Government of India. Appearance, old Prose. Correct.

Pratyaksha-maṇididhiti-vyákhyá-vivechana. An exposition of Raghunátha's commentary on the *Pratyaksha Khaṇḍa* of Ganges'a. By Rudra Nyáyaváchaspati.

Beginning. अनिर्व्वाच्यगुणग्राममानताशेषकामदं ।
चिराय चिन्मयं + न प्रणम्याहमुपास्महे ॥
विद्यानिवासपुत्रस्य न्यायवाचस्पतेरियं ।
निर्म्मितिर्निर्म्मलधियामानन्दयतु मानसं ॥
प्रेक्षावदिति । प्रेक्षावत्प्रवृत्तये प्रयोजनवत्तामभिधेयसम्बन्धौ च—

End. अन्यथा तवापि विशिष्टज्ञानसामग्र्येव प्रवृत्तौ हेतुः स्यादतोऽपि चेति । श्रीः ।

Colophon. इति श्रीमद्विविधपण्डितमण्डलीमुकुटमणिश्रीरुद्रन्यायवाचस्पतिभट्टाचार्य्यविरचितश्रीमहामहोपाध्यायभट्टाचार्य्यशिरोमणिप्रकाशितप्रत्यक्षमणिदीधितिव्याख्याविवेचनं सम्पूर्णतामगमत् । संवत् १६७० । आश्विने ।

विषयः । रघुनाथशिरोमणिकृतप्रत्यक्षचिन्तामणिदीधितिनामकटीकायाः व्याख्यानं ।

No. 1548. मण्यालोकदर्पणं ।

Substance, country-made paper, 9 × 3½ inches. Folia, 221. Lines, 11—12 on a page. Extent, 3,390 s'lokas. Character, Nágara. Date, Sm. 1669. Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Correct.

Manyáloka-darpana. Annotations on the *Manyáloka* of Jayadeva Mis'ra. By Mahes'a Thakkura. The MS. is limited to the *Pratyaksha Khanda.*

Beginning. शङ्करजगदम्बिकयोरङ्के पङ्केन खेलन्तं ।

लम्बोदरमवलम्बे लम्बेरमराजचारुमुखं ॥

पुंसामार्त्तिभिदे कलानिधिकुलोत्तंसाय संसारभी-

विध्वंसाय मुनीन्द्रमानसमरोहंसाय कंसारये ।

व्यङ्गालम्बितशिक्यमुज्ज्वलरुचिं गुञ्जावतंसादिना

यं साशङ्कमुपागमत् कमलभूः कृष्णाय तुभ्यं नमः ॥

चतुर्भिरास्यैश्चतुरोऽपि वेदानुच्चारयन्नक्रमतो विरिञ्चिः ।

पाठाग्रपग्या + विशेषमीष(?) सन्तोषिशिष्यः शिवमातनोतु ॥

धृतेनावनतिं (?) महीधरसुता भागावरुद्धं शिरो

नैवोद्वहति चारुसान्त्वनवचा मूकायितार्द्धं मुखे ।

आश्लेषेऽपि यथाचितं न हि भवत्येकाकिना वाऽनया

मामव्यादिति विह्वलः प्रियतमामानापनोदे शिवः ॥

धनाय पद्मां भविकाय दुर्गां गृहाय गौरीमितरे श्रयन्तु ।

अहं महानन्दपदस्य धात्रीं विद्याविधात्रीं गिरमाश्रितोऽस्मि ॥

गौर्य्या गिरीशादिव कार्त्तिकेयो यो धीरया चन्द्रपतेरलभि ।

आलोकमुद्दीपयितुं नवीनं स दर्पणं व्यातनुते महेशः ॥

अत्र श्लोकानां व्याख्या टीकाकृता सुगमत्वात् (न) कृता सा चैवं । प्रारोप्सित-प्रतिबन्धकविघ्नविघातकं पुरभिन्नमस्काररूपं मङ्गलं शिष्यशिक्षायै निबध्नाति गुणेति ।

End. प्रमुष्टेति । तथा चायथार्थत्वमौत्सर्गिकमिति भावः । तत्रोक्तस्मरणमभि-प्रेत्याह,—तदाऽरिति । तत्रेदन्ताविचारः समाप्तः ॥

विधाय विदुषां प्रीत्यै प्रत्यक्षालोकदर्पणं ।
श्रीगोपाले महेशेन तस्याकारि समर्पणं ॥

Colophon. इति श्रीमहेशठक्कुरविरचिते आलोकदर्पणे प्रत्यक्षखण्डः समाप्तः ।
संवत् । १६६९ । श्रावणवदि ३ रा ।

विषयः । जयदेवमिश्रकृतप्रत्यक्षचिन्तामण्यालोकटीकाया व्याख्यानं ।

No. 1549. आगमकौमुदी ।

Substance, palm-leaf, 18 × 1½ inches. Folia, 112. Lines, 4 on a page, Extent, 1,848 s'lokas. Character, Bengali. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose and verse. Incorrect.

Agama-Kaumudí. A compilation from different Tantras on the S'ákta cult, giving a brief exposition of its principles and supplying all the principal mantras for the worship of S'ákta divinities. By Rámakrishṇa.

Beginning. सर्व्वमन्त्रसमाराध्यं कृष्णं न्यस्य हृदम्बुजे ।
तन्यते रामकृष्णेन श्रीमदागमकौमुदी ॥

End. भटित्यारोग्यदा विद्या चिरजीव्यनुकारिणी ।
धनसम्पत्प्रदा चैव शचोराग्निविनाशिनी ॥
इति प्रत्यङ्गिराप्रकरणं ।

Colophon. इति महामहोपाध्यायश्रीरामकृष्णकृता आगमकौमुदी समाप्ता ॥

विषयः । अत्र प्रथमं अकथहचक्र-नक्षत्रचक्र-राशिचक्र-भूतचक्र-नाड़ीचक्र-अकड़मचक्र-जातिचक्र-ऋणिधिनिचक्राणि । ततः अदीक्षितपुरुषपशुलक्षणं गुरुलक्षणञ्च । ततः पञ्चदेवतापूजा स्त्रीशूद्रयोः प्रणवरहितमन्त्रदानञ्च । ततः शूद्रस्य मन्त्रदाननिषेधः सिद्धमन्त्रे विचाराभावकथनं । दीक्षायां चान्द्रशोरविचारः । हरचक्रं चक्रशुद्धिप्रकरणञ्च । मन्त्राणां दशविधसंस्कारः । दीक्षाप्रकरणं । षट्चक्रकथनं । प्राणायामः । मातृकान्यासः । कराङ्गन्यासः । आधारशक्तिध्यानं । अघ्यस्थापणं । प्राणप्रतिष्ठा । आवाहनमुद्रा । शिवपूजाप्रकरणं । स्वाहास्वधाविचारः । नैवेद्यनिवेदनमन्त्राः । जपसमर्पणमन्त्राः । मालालक्षणं । जपलक्षणं । मालासंस्कारः । प्रणामलक्षणं । मन्त्रग्रहणविधिः । उपदेशप्रकरणं पुरश्चरणविधिः । रामकृष्णगोपालानां मन्त्राः, तद्गायत्री च । लक्ष्मीसरस्वती-

शिवानां मन्त्राः, काल्यादिशक्तिमन्त्राश्च। दुर्गामन्त्राः। भुवनेश्वरीमन्त्राः। मन्त्रभेदाः। मालामन्त्राः। सुन्दरीमन्त्राः। तारामन्त्राः। श्यामामन्त्राः। अनिरुद्धमन्त्राः। प्रचण्डचण्डिकामन्त्राः। गणेशमन्त्राः। उपविद्या। योगिनी-मन्त्राः। मृत्युञ्जयमन्त्राः। कर्णपिशाचीमन्त्राः। हनूमतो मन्त्राः। गरुड़मन्त्राः। यन्त्रसंस्कारः। मन्त्रगायत्री। जपप्रकरणं। भूमौ मालापतनजनितदोषाः। वैष्णवरात्रौ जपनिषेधः। प्रकीर्णकथनं। प्रत्यङ्गिराकथनञ्च॥

No. 1550. शुद्ध्यादिव्यवस्थासङ्क्षेपः।

Substance, palm-leaf, 20 × 1½ inches. Folia, 131. Lines, 4—5 on a page. Extent, 2,423 s'lokas. Character, Bengali. Date, Sk. 1610. Place of deposit, Calcutta, Government of India. Appearance, old. Prose and verse. Correct.

S'uddhyádi-vyavasthá-sankshepa. An elaborate treatise on funerals, mournings, Sráddha, s'ati, and impurity of the person arising from birth in one's family and other causes, as also on certain religious rites to be performed on particular lunar days, and on the determination of the particular moments when such rites should be observed. By Chintámaṇi Nyayvágis'a Bhaṭṭáchárya of Gaur. The work professes to be a part of a comprehensive digest of civil and canonical law, which bore the title of *Smṛiti-vyavasthá.* No complete MS. of this digest has as yet been met with.

Beginning. ॐ नमः श्रीपरमदेवतायै। अथ शुद्ध्यादिव्यवस्थासङ्क्षेपः। तत्रादौ शुद्धि-पदार्थो निरूप्यते। तत्र विहितकर्म्मार्हत्वप्रयोजको धर्म्मविशेषः शुद्धिः।

End. एतासु पौर्णमास्यन्तमासो ग्राह्य इति तिथिव्यवस्था सम्पूर्णा।

Colophon. इति गौड़देशनिवासिमहामहोपाध्यायश्रीचिन्तामणिन्यायवागीशभट्टाचार्य्यकृतौ स्मृतिव्यवस्थायां शुद्ध्यादितिथ्यन्तसङ्क्षेपः समाप्तः।

शाके हरित् षोड़शकेऽर्कवारे पक्षे वलक्षे दिवसे तु ++।

सारं स्मृतीनां मधुमासि विद्वान् श्रीमान् प्रसादो व्यलिखत्तरावान्॥

यत्राङ्काः १६१०।

विषयः। शुद्धिलक्षणं। सहमरणानुमरणयोर्व्यवस्था। अनयोरशौचसङ्करकथनं। अति-क्रान्ताशौचव्यवस्था। अशौचविधिनिषेधौ। अशौचसङ्करकथनं। गर्भस्रावा-शौचं। स्त्र्यशौचं। बालाद्यशौचं विदेशस्थाशौचं। सपिण्ड्याद्यशौचं। अशौच-

विषयः। वर्ज्यावर्ज्यनिरूपणं। मातामहाद्यशौचं। मृत्युविशेषाशौचं। शौचापवादः शवानुगमनाशौचं। अस्थिसञ्चयकथनं। अङ्गस्पर्शनकथनं। गङ्गायामस्थिक्षेपविधिः। द्रव्यशुद्धिकथनं। वापीकूपतड़ागेषु मृते जलशुद्धिनिरूपणं। गृहमरणे तच्छुद्धिकथनं। सूतिकादिमरणे दाहव्यवस्था। पर्णनरदाहव्यवस्था। मुमूर्षुकृत्यं। प्रेततर्पणविधिः। पुत्रस्य वर्षमध्ये कृत्यनिरूपणं। पिण्डदानव्यवस्था। अशौचान्तिमदिनकृत्यं। अशौचान्तद्वितीयदिनकृत्यं। वृषोत्सर्गकालनिरूपणं। वृषलक्षणं। प्रेतक्रियाधिकारिणः। स्त्रियाः श्राद्धाधिकारिणः। सामान्यतोऽनधिकारिणः। दत्तकपुत्रग्रहणविधिः। तदशौचादिनिरूपणं। पूर्व्वामध्यमोत्तराभेदेन मृतक्रियायास्त्रैविध्यकीर्त्तनं। उभयमुखीदानं। विपुलगृहदानं। श्राद्धलक्षणं। देवतालक्षणं। यागलक्षणं। साहित्यलक्षणं। तन्त्रतालक्षणं। नवान्नश्राद्धकालः। मघात्रयोदशीश्राद्धविधिः। अश्वयुक्कृष्णपक्षनिमित्तकश्राद्धकथनं। शस्त्रादिहतानां चतुर्दशीश्राद्धकथनं। अष्टकाश्राद्धकथनं। श्राद्धवेलानिरूपणं। मलमासकर्त्तव्यकर्म्मनिरूपणं। सन्धितावर्द्धमानाद्यमावस्याश्राद्धकालनिरूपणं। पार्व्वणव्यवस्था। निमन्त्रणविधिः। दर्भकथनं। श्राद्धशेषभोजने नियमकथनं। आमश्राद्धव्यवस्था। जीवत्पितृकस्य श्राद्धव्यवस्था। मासिकषाण्मासिककालकथनं। सपिण्डीकरणविधिः। तदपकर्षव्यवस्था। विघ्नपतितादिश्राद्धकालकथनं। एकोद्दिष्टकालः। अम्बुघटश्राद्धकथनं। त्रिदण्डिसन्न्यासिनां मरणे तस्य पूर्व्वाश्रमपुत्रकृत्यनिरूपणं। सपिण्डीकरणान्तश्राद्धाधिकारिनिरूपणं। जन्मतिथिव्यवस्था। पवित्रव्यवस्था। प्रतिपत्कृत्यनिरूपणं। द्वितीया। तृतीया। चतुर्थी। पञ्चमी। षष्ठी। सप्तमी। विधानसप्तमी। माघसप्तमी। अष्टमी। जन्माष्टमीव्यवस्था। दूर्व्वाष्टमी। भीष्माष्टमी। नवमी। श्रीरामनवमीव्यवस्था। दशमी। दुर्गोत्सवव्यवस्था। बलिदानव्यवस्था। धूपादिनिरूपणं। उपचाराः। एकादशी। चातुर्म्मास्यव्रतव्यवस्था। आरब्धव्रतत्यागप्रायश्चित्तं। नक्तव्रतव्यवस्था। मत्स्यादिभोजनत्यागफलं। हरिशयनव्यवस्था। द्वादशी। श्रवणाद्वादशीव्यवस्था। त्रयोदशी। वारुणत्रयोदशीव्यवस्था। चतुर्दशी। सावित्रीचतुर्दशीव्यवस्था। अनन्तव्रतं। अघोराख्यचतुर्दशी। प्रेतचतुर्दशी। भूतचतुर्दशी। रटन्तीपूजाव्यवस्था। पाषाणचतुर्दशी। मदनचतुर्दशी। पूर्णिमा। महाज्येष्ठीव्यवस्था। शिवरात्रिव्यवस्था। कोजागरव्यवस्था। सङ्क्रान्तिः। रात्रिसङ्क्रमणव्यवस्था। कार्त्तिकमासकृत्यनिरूपणं। ग्रहणव्यवस्था। अमावास्या। अर्द्धोदययोगव्यवस्था। युगाद्यानिरूपणं। युगाद्यारहस्यकथनं। मन्वन्तराव्यवस्था।

No. 1551. क्रमदीपिका ।

Substance, palm-leaf, 11 × 1½ inches. Folia, 76. Lines, 3 on a page. Extent, 1,008 s'lokas. Character, Bengali. Date, Sk. 1609. Place of deposit, Calcutta, Government of India. Appearance, old. Prose and verse. Corrected.

Kramadípiká. Rules for the worship of Vishṇu in the different forms of Kṛishṇa, Gopála, &c. Anonymous.

Beginning. कला तु माया नरकान्तमूर्त्तिः कलं क्वणद्वेणुनिनादरम्यः ।
श्रितो हृदि व्याकुलयंस्त्रिलोकीं श्रियेऽस्तु गोपीजनवल्लभो वः ॥
गुरुचरणसरोरुहद्वयोत्थान् महितरजःकणकान् प्रणम्य मूर्द्ध्ना ।
गदितमिह विरिञ्चिनारदाद्यैः यजनविधिं कथयामि शार्ङ्गपाणेः ॥

End. जगदिदमनुविद्धं येन यस्मिन् प्रसूते
यदनुततमजस्रं याति चाधिष्ठितायाः ।
यदुरुमहदुदर्व्वियाविध + + गोपीं
ओममितसुखबोधज्योतिषं नौमि कृष्णं ॥

Colophon. इति श्रीक्रमदीपिकायां अष्टमः पटलः । समाप्तश्चायं ग्रन्थः ।

विषयः । विष्णोरर्चनविशेषविधानं ।

No. 1552. आधानप्रायश्चित्तं ।

Substance, country-made paper, 9¾ × 3¾ inches. Folia, 22. Lines, 8—11—12 on a page. Extent, 532 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Correct.

A'dhána-práyas'chitta. Expiations for irregularities and defects in the performance of A'dhána rites, or the collection and preservation of the household sacred fire. Anonymous.

Beginning. अथ कानिचित् प्रायश्चित्तानि लिख्यन्ते । विहरणकालात् प्राक् गार्हपत्यनाम्ने
शुचिर्भूत्वा गार्हपत्यमग्ननारणी लेपयित्वा यजमानो मन्थनं कुर्य्यात् कारयेद्वा ।

End. द्वितीयाधानेषु सङ्कल्पात् परतो नालम्भुकायां अपरध्यैव समापयेत् ।

Colophon. इत्याधानप्रायश्चित्तं ।

विषयः । आधानप्रायश्चित्तप्रकरणं ।

No. 1553. ऐष्टिकप्रायश्चित्तं ।

Substance, country-made paper, 9 × 4½ inches. Folia, 13. Lines, 4—11—12 on a page. Extent, 264 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Incorrect.

Aishṭika-práyas'chitta. Expiations for errors, irregularities and accidents occurring during the performance of Ishṭi rites, according to the rules of Bodháyana and As'valáyana. Anonymous.

Beginning. आश्वलायनस्य बौधायनमवलम्ब्य दर्शपूर्णमासादीनि कर्म्माणि कुर्वन्तः सुगमपक्षमवलम्ब्य ऐष्टिकानि प्रायश्चित्तानि कानिचित् लिख्यन्ते ।

End. प्राश्य शेषं समाधयेत् ।

Colophon इति कानिचित प्रायश्चित्तानि समाप्तानि ।

विषयः । ऐष्टिकप्रायश्चित्तप्रकरणं ।

No. 1554. दर्शपूर्णमासप्रकरणं ।

Substance, country-made paper, 9½ × 4½ inches. Folia, 15. Lines, 7—14 on a page. Extent, 451 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Incorrect.

Dars'apúrṇamása-prakaraṇa. The chapter of the new and the full moon rites from of the Bhodháyana Kálpa Sútra.

Beginning. अमावास्येन पौर्णमासेन वा हविषा यक्ष्यमाणो भवति स पुरस्तादेव हविरातञ्चनमुपकल्पयत एकाहेन वा द्व्यहेन वा यथर्त्वथ वै ब्राह्मणं भवति ।

End. सन्निष्ठत अमावास्यं वा पौर्णमासं वा हविः ।

Colophon. इति बौधायनसूत्रे दर्शपूर्णमासप्रकरणं समाप्तं ।

विषयः । दर्शपूर्णमासप्रकरणं ।

No. 1555. दर्शपूर्णमासप्रायश्चित्तप्रकरणं ।

Substance, country-made paper, 9½ × 4½ inches. Folia, 21. Lines, 11—12—13—15 on a page. Extent, 586 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Incorrect.

Dars'a-púrṇamása-práyas'chitta-parkaraṇa. Expiations for errors, irregularities and accidents occurring during the performance of the new- and the full-moon sacrifices according to the rules of Bodháyana. Anonymous.

Beginning. विहितं मन्त्राद्यं गोयेन(?) मन्यनेन प्रत्यवरूढेऽग्नौ आयतपत्तेयात् (?) ।

End. तदेव होमकालेऽन्वाधानवर्जमिति एतैवाष्टतैकस्मिन्नुदापे वै द्वयोर्वति चाविकृतिषु अन्वाहित——इतः परं खण्डितं ।

विषयः । बौधायनसूत्रोक्तदर्शपूर्णमासप्रायश्चित्तप्रकरणं ।

No. 1556. ऐकाहिकचातुर्म्मास्यप्रयोगः ।

Substance, country-made paper, $9\frac{1}{4} \times 4\frac{1}{4}$ inches. Folia, 7. Lines, 10—11—12 on a page. Extent, 154 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Incorrect.

Aikáhika-cháturmásya-prayoga. A guide to the performance of the Ephemeral and the Quadimensial rites according to the rules of Bodháyana.

Beginning. ॐ बौधायनीयकल्पमवलम्ब्य ऐकाहिकचातुर्मास्यप्रयोगः प्रकाश्यते ।

End. बौधयनीयकल्पोक्तचातुर्मस्यनिरूपण ।

ऐकाहिकेन विधिना कारीत्यं चतुष्टये ॥

Colophon. इति बौधायनोक्तचातुर्मास्यप्रयोगः ।

विषयः । चातुर्म्मास्यप्रयोगकथनं ।

No. 1557. न्यायरत्नमाला ।

Substance, country-made paper, 10 × 4 inches. Folia, 63. Lines, 8 on a page. Extent, 1,500 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose and verse. Correct.

Nyáya-ratnamálá. A dissertation on some of the leading topics of the Nyáya doctrine. The MS. is incomplete, and the author's name is not ascertainable. Hall's *Contributions*, p. 172.

Beginning. अङ्गस्वरूपसम्बन्धं प्रमाणं सप्रकारकं ।

यदुक्तं वार्त्तिकि (?) सम्यक् तत् सङ्क्षेपेण + कथ्यते ॥

End. यद्ङ्गस्वरूपं यथाविधं यस्य तस्य प्रधानेन सम्बन्धो यथा च यस्य ।
विशेषद्वयदानेन सामान्यस्यैव वाच्यता ॥
यद्यपि नियोगस्य कृत्यदेशतया प्रधानस्यान्यादृशी ——— इत्यतः खण्डितं ।

विषयः । यद्ङ्गस्वरूपं यथाविधं, प्रधानेन सह तस्य च यादृशः सम्बन्धः, यथा च तत्र प्रमाणं, तत्समुदायनिरूपणं । जातिद्रव्यगुणक्रियाभेदेन दृष्टार्थाङ्गानां चतुर्विधत्वनिरूपणं । सन्निपातोपकारकं, आरादुपकारकञ्चेति अदृष्टार्थस्य द्वैविध्यनिरूपणं । पुनरेषामवान्तरभेदनिरूपणं । दृष्टादृष्टोभयार्थकनिरूपणं । नियमादृष्टकथनं । सामान्यतोऽङ्गलक्षणं । विधिशक्तिनिरूपणं । जातिलिङ्गसङ्ख्यानामेककारकान्वितत्वकथनं । श्रुतिलिङ्गाधिकरणं । विनियोगस्वरूपकथनं स्वर्गकामफलविशिष्टत्वेन भाव्यताकथनं । तत्र तत्र न्यायकीर्त्तनञ्च । लिङ्गवाक्यसमाख्यादीनामवान्तरभेदकथनपूर्व्वकं तत्तत्स्वरूपकथनं । अन्विताभिधानकथनं । अपूर्व्वकथनं । दैवनिर्म्मितस्यैव निदाघसमयवर्त्तिमध्यन्दिनतपनातपनिपातसन्तप्ततनोरिव मेघपुष्पगर्भमेघजालस्य सन्तापोत्पादकत्वं कर्म्मणः फलजनकत्वमुत अन्यकृतस्य प्रपादिवद् वा भोजनादिवद्वा स्वयं कृतस्येति निरूपणं । केषां केनप्रकारेण अनुष्ठायकत्वमिति तन्निरूपणं । एकप्रयोगविधिविधेयानां बहूनामङ्गप्रधानानामेककर्त्तृकाणामवश्यम्भाविनि क्रमे सति तद्विशेषनिरूपणं । क्लावादः । प्रयोगविशेषविचारः । कर्म्माधिकारनिरूपणं । प्रयोगविध्यधिकारविधीनां स्वरूपकथनं । उपदेशात्मकातिदेशात्मकत्वभेदात् शब्दस्य द्वैविध्यकथनं । तत्तल्लक्षणनिरूपणं । आतिदेशिकाङ्गसम्बन्धनिरूपणं । स्वर्गकामो यजेतेत्यादौ प्रकृतिप्रत्ययादीनामर्थविवेचनं । उहनिरूपणं । विकृतिषु पदार्थेयत्ताचिन्तनं । प्रकृतिलक्षणादिविचारः । तन्त्रलक्षणं । प्रयोगपरिमाणचिन्तनं । शमतायानिमित्तत्वकथनं । लिङर्थनिरूपणं । इतः खण्डितं ।

No. 1558. अद्वैतसिद्ध्युपन्यासः ।

Substance, country-made paper, 10 × 4½ inches. Folia, 9. Lines, 9—10 on a page. Extent, 208 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Incorrect.

Advaitya-siddhiyupanyása. An illustration of the *Advaita-siddhi* of Madhusúdana Sarasvati, designed to prove the non-dual theory as opposed to the Nyáya doctrine. The MS. is incomplete, and the author's name cannot be made out. Hall's *Contributions*, pp. 109—157.

Beginning. साक्षी चेता केवलो निर्गुणश्चेति श्रुत्या च ब्रह्मणानादिर्द्देवैः समेतैर्द्दृष्टशङ्करः।

End. प्रागेव ईक्षितत्वादिश्रवणेन तस्य सोपाधिकत्वासम्भवाच्चेन्न——(इतः खण्डितं ।)

विषयः । अद्वैतवादसंस्थापनं ।

No. 1559. छलाक्षरं, वा पवमानं ।

Substance, country-made paper, 11 × 4½ inches. Folia, 10. Lines, 6 on a page. Extent, 108 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Incorrect.

Chhalákshara alias *Pavamána.* Initials of Rig mantras required for the performance of the Pavamána rite This MS. appears quite distinct from the works noticed on pp. 14, 16, 17, and 50.

Beginning. अग्नमभो तू तू । त्वमग्ने भू । अग्निं टू कू । अग्निर्दवाधूर्षेदि । प्रेष्ट क्रेढौकुत्व-न्नोभेगो । एच्युष डैनु । आतेथ जू । त्वामग्ने वी । ग्रे विषस्वयो । एकोनविंशति-प्रथमः ।

End. पवस्व मधुडुलम भीगु । अभियुम्नं ठीलैभुभू । आमो तानीघलै टुकुवेक । एन-मुत्यचौ क्रेडुनौडुलु खे । ससुन्नेतने दैनुगू । त्वच्चङ्गदचिणुचागि । एषस्य गैमी डौठै ढूके ॥ २५ ॥

पञ्चविंशदेकादश ॥ २८४ ॥ पवमानं समाप्तम् ॥

विषयः । ऋक्प्रतीकानि ।

No. 1560. एकाम्रचन्द्रिका ।

Substance, palm-leaf, 13 × 1¼ inches. Folia, 103. Lines, 5 on a page. Extent, 2,253 s'lokas. Character, Udiyá. Date, ? Place of deposit, Calcutta, Government of India, another copy Calcutta, Dr. Rájendralála Mitra. Appearance, old. Prose and verse. Generally correct.

Ekámra-chandriká. A guide to pilgrims visiting Bhuvanes'vara, giving in detail the religious duties to be performed at the different sacred spots, temples, images and pools of that place, and the merit of doing the same. The work is made up of extensive quotations from the Kapila Saṅhitá, the Ekámra Puráṇa, the S'iva Puráṇa, and other works which treat of the sacred places of Orissa, and comprises a summary of the religious history of the place. It is divided into four chapters (*Prakás'as*). All the principal temples have been described at some length, and anecdotes—mostly apocryphal—regarding them given in detail. Anonymous.

Beginning. विघ्नेश्वरं नमस्कृत्य ततस्त्रिभुवनेश्वरं ।

अष्टादशपुराणाञ्चेर्लिखाम्येकाम्रचन्द्रिकाम् ॥

End. इति सर्वपुराणाञ्चेरेषैकैकाम्रचन्द्रिका समुद्धृत्य महादेवपादयोरर्पिता मया ॥

Colophon. इत्येकाम्रचन्द्रिकायां चतुर्थः प्रकाशः ।

इतः परं "आचार्याय प्रदातव्यं" इत्यादयोऽष्टौ श्लोकाः सन्ति ।

विषयः। अत्र चत्वारः प्रकाशाः सन्ति । तत्र प्रथमे प्रकाशे ।—अनन्तपुरुषोत्तमादिदर्शनम । उग्रेश्वरदर्शनं । एकाम्रक्षेत्रमाहात्म्यवर्णनादिः । एकाम्रेश्वरदर्शनं । कल्पवृक्षदर्शनं । कुमारदर्शनं । गणेशदर्शनं । गोपालिनीदर्शनं । गुप्तेश्वरदर्शनं । चण्डेश्वरदर्शनं । चित्रेश्वरदर्शनं । त्रिभुवनेश्वरदर्शनं । पादहरातीर्थेश्वरयोर्दर्शनं । विन्दुसरः-स्नानादिफलं । विश्वेश्वरदर्शनं । वृषभदर्शनं । मङ्गलाचरणादिः । शबरेश्वर-दर्शनं । क्षेत्रपालोक्तिः ।

२, प्र० ।—अष्टायतनमाहात्म्यादिः । अलाबुकेश्वरमाहात्म्यं । आघातकेश्वरदर्शनं । इन्द्रेश्वरदर्शनं । ईशानेश्वरमाहात्म्यं । ईशानेश्वरादिदर्शनं । उत्तरेश्वरादिदर्शनं । उत्पलेश्वरदर्शनं । कपिलेश्वरदर्शनं । कपालमोचनेश्वरदर्शनं । कपालीशिखिर-दर्शनं । कोटितीर्थमाहात्म्यं । केदारेश्वरमाहात्म्यं । कुक्कुटेश्वरदर्शनं । गङ्गायमुना-माहात्म्यं । गन्धवतीमाहात्म्यं । गौरीकुण्डादिमाहात्म्यं । गोकर्णेश्वरदर्शनं । चतुर्दशयात्राकर्त्तव्यतोक्तिः । जटिलेश्वरदर्शनं । देवीपादतीर्थमाहात्म्यं । दैत्येश्वर-दर्शनं । पापनाशनकुण्डमाहात्म्यं । पूर्वेश्वरदर्शनं । वैद्यनाथेश्वरदर्शनं । ब्रह्मेश्वरा-दिमाहात्म्यं । भास्करेश्वरदर्शनं । भीमेश्वरादिदर्शनं । मध्यमेश्वरदर्शनं । यमेश्वर-दर्शनं । रामेश्वरादिमाहात्म्यं । रुद्रेश्वरदर्शनं । रावणेश्वरदर्शनं । लङ्केश्वरदर्शनं । लक्ष्मीश्वरदर्शनं । शक्रेश्वरादिदर्शनं । सुवर्णजालेश्वरमाहात्म्यं । सुरेश्वरमाहात्म्यं । सिद्धेश्वरादिमाहात्म्यं । सिद्धेश्वरमाहात्म्यं । स्वर्णकूटेश्वरदर्शनं । सूक्ष्मेश्वरदर्शनं ।

३, प्र० ।—अष्टमीयात्रा । अशोकाष्टमीयात्रारम्भः । उत्थापनचतुर्दशीयात्रा । चन्दनयात्रा । दमनकभञ्जनयात्रा । धृतकम्बलयात्रा । परशुरामाष्टमीयात्रा । पवित्रारोहणयात्रा । शयनयात्रा । वन्दापनायात्रा । माघसप्तमीयात्रा । यमद्वि-तीयायात्रा । शिवरात्रियात्रा । षष्ठीयात्रा ।

४, प्र० ।—अष्टतीर्थविधुक्तिः । अलाबुकुण्डगमनं । अनन्तपुरुषोत्तमादिदर्शनं । आम्रकतलस्तुफलं । कोटिलिङ्गार्चनविधिः । गङ्गायमुनातीर्थगमनं । चातुर्मास्य-विधिः । छायायात्रा । पापनाशिनीकुण्डगमनादिः । परमेश्वरप्रार्थना । ब्रह्मकुण्ड-गमनं । विन्दुह्रदे शरीरत्यागः । मेघकुण्डगमनं । रामकुण्डगमनादिः । क्षेत्रपाल-प्रदक्षिणा । क्षेत्रवासफलं । क्षेत्रमरणं ।

No. 1561. एकाम्रपुराणं ।

Substance, palm-leaf, Púrva Khaṇḍa 16½ × 1⅓, Uttara Khaṇḍa 15 × 1¼ inches. Folia, 205. Lines, 4—6—7 on a page. Extent, 6,000 s'lokas. Character, Uḍiyá. Date, ? Place of deposit, Calcutta, Government of India. Another copy, Calcutta, Dr. Rájendralála Mitra. Appearance, old. Verse. Incorrect.

Ekámra Puráṇa. One of the *Upa* or minor Puráṇas, designed to record the religious merits and anecdotes connected with the several temples and sacred places of a tract of land called Ekámra Kshetra, or the sacred grove of the solitary mango tree, now known by the name of Bhuvanes'vara in the Puri district. It is divided into five parts *(Aṅs'as)*, and comprises in all 70 chapters. The work cannot be under any circumstance earlier than the 8th century of the Christian era. CONTENTS: 1. Introduction. 2. Enquiry of the sages regarding the place. 3. Story of S'iva's journey from Benares to Bhuvanes'vara. 4. Story of Brahmá's connection with the place. 5. The primary Sargas. 6. Characteristics of the Yugas. 7. The seven Dvipas. 8. Praise of Bhárata Varsha. 9. The seven Pátálas or lower regions. 10. The upper regions. 11. Description of Ekámra. 12. Desire of Brahmá to see the place. 13. He visits the lingams. 14. Origin of Brahmes'vara. 15. Advice to the Devas. 16. Origin of Bháskares'vara. 17. Do. of Rámes'vara. 18 and 19. Do. of Síddhes'vara. 20 and 21. Vinduhrada Lake. 22. The penance of Pratikása. 23. Praise of the Lake. 24. Praise of the sacred field of the mango grove. 25. Visit of Kratu? 26 and 27. The wars of the Devas and. Asuras. 28. Story of Kálanemi. 29. The arrival of Mahes'a. 30. Story of Hiraṇyáksha. 31. Bhrigu's account. 32. Advent of Hiraṇya and Kas hipu in Ekámra. 33. The advent of the Deví. 34 to 36. Story of Kírtivása and the Deví. 37. Praise of the Deví's feet. 38. Praise of Meghes'vara. 39 and 40. Praise of Pápanásana pool. 41. Pool of Alábu. 42. Praise of Kapiles'vara. 43. Rules for worshipping Koṭiliṅa. 44 and 45. Story of a father and son. 46. Praise of Suparṇajales'vara. 47. Story of Bálakhilya. 48. Praise of Gokarṇes'vara. 49. Do. of Paras'urámes'vara. 50. Visit of Ráma to the place. 51. Description of Pariplava. 52. Destruction of Kumáṭhánaṅga. 53. Praise of Rámes'vara. 54.

and 55. Worship of eight images in eight diagrams. 56. Praise of Ámratakes'vara. 57. Do. of Jatiles'vara. 58 and 59. Peculiarities of perfect lingams. 60. The guardians of the sacred grove. 61. Praise of Bhímes'vara. 62. Do. of Savanes'vara. 63. Merits of walking round the circuit of the sacred place. 64. The festival of Chháyá játrá. 65. Story of Bhavishya and Sambhú. 66. Festivals of Bhuvanes'vara. 67. Car festival. 68. The festival of As'okaratha. 69. The fourteen great festivals. 70. Summary of the work.

Beginning. कीर्त्तिर्यस्य सुरासुरैर्मुनिवरैरागीयते नित्यशो
नाकक्ष्मातलवासिभिः सुरनरैर्विद्याधरैः किन्नरैः ।
पातालेष्वपि कन्दरेषु च महीध्राणां गतैः पन्नगै-
र्ब्रह्मोपेन्द्रसवासवान्वितजगत्कर्त्ते नमः शम्भवे ॥

End. एकस्तेजोरजोभिः परिहृतविमलज्योतिषां यो विभाग-
स्त्वष्टौ ते लोकपालाः सुविधृतशिरसा शासने नित्ययुक्ताः ।
सृष्टार्द्धाभूतसङ्घाश्चतुरजनि जगत्पञ्चभूतात्मकं यो
योऽसौ मूर्त्तिर्विभर्त्ति द्विगुणितचतुरां पातु वः क्षत्रिवासाः ॥

Colophon. इत्येकाम्रपुराणे षट्साहस्र्यामैश्वर्य्यां संहितायां पञ्चमेऽंशे सप्ततितमोऽध्यायः ।

विषयः । १ अध्याये, वसुनिर्देशः । २ अध्याये, आदिप्रश्नः । ३. गौरीशङ्करसंवादः । ४, ब्रह्मगीताकथनं । ५, आदिसर्गः । ६, युगधर्म्माः । ७. सप्तद्वीपकीर्त्तनं । ८, भारतवर्षानुकीर्त्तनं । ९, सप्तपातालकीर्त्तनं । १०, ऊर्द्ध्वलोककीर्त्तनं । ११, एकाम्रवर्णनं । १२, ब्रह्मोद्वेगः । १३, लिङ्गदर्शनं । १४, ब्रह्मेश्वरप्रभवः । १५, सर्वदेवोपदेशः । १६, भास्करेश्वरप्रभवः । १७, रामेश्वरप्रभवः । १८, सिद्धेश्वरमाहात्म्यं । १९, सिद्धेश्वरानुकीर्त्तनं । २०, विन्दुह्रदस्वरूपम् । २१. विन्दुह्रदोत्पत्तिः । २२, प्रतिकाम्रव्रतकीर्त्तनं । २३, विन्दुह्रदमाहात्म्य । २४, क्षेत्रमाहात्म्यं । २५, क्रतुदर्शनं । २६, देवासुरसन्नहनं । २७, देवासुरसङ्ग्रामः । २८, कालनेमिशक्तिवधः । २९, मन्त्रेशागमनं । ३०, हिरण्याक्षवधः । ३१, भृगुवाक्यं । ३२, हिरण्यकशिपुतपोवनागमनं । ३३, देव्यवतरणं । ३४, क्षत्रिवासस उपाख्यानं । ३५, देव्याः सम्बोधनं । ३६, क्षत्रिवासःकृतासुरवधः । ३७, देवीपदद्वयमाहात्म्यम । ३८, मेघेश्वरमाहात्म्यं । ३९, ४०, पापनाशनमाहात्म्यं । ४१, अलावुतीर्थमाहात्म्यं । ४२, कपिलेश्वरमाहात्म्यं । ४३, कोटिलिङ्गार्चनविधिः । ४४. पितापुत्रसङ्कथा । ४५, पिण्डसम्बोधनं । ४६, सुपर्णजलेश्वरमाहात्म्यं । ४७, वालखिल्यशिवसंवादः । ४८ गोकर्णेश्वरमाहात्म्यम् । ४९, परशुरामेश्वरमाहात्म्यम् । ५०, श्रीरामागमनं । ५१,

पारिप्लववर्णनं । ५२, कमठानङ्गवधः । ५३, श्रीरामेश्वरानुकीर्त्तनं । ५४, अष्टायतनविधिः । ५५, अष्टमूर्त्त्यर्चनविधिः । ५६, आम्रातकेश्वरमाहात्म्यं । ५७, जटिलेश्वरमाहात्म्यं । ५८, सिद्धलिङ्गानुकीर्त्तनं । ५९, साधारणोक्तिः । ६०, क्षेत्रपालोत्पत्तिः । ६१, भीमेश्वरमाहात्म्यं अष्टषष्ठ्यनुकीर्त्तनं । ६२, शवरेश्वरमाहात्म्यं । ६३, क्षेत्रप्रदक्षिणमाहात्म्यं । ६४, छायायात्रावर्णनं । ६५, भविष्यदपशम्भुसंवादः । ६६, यात्राकथनम् । ६७, रथप्रतिष्ठा । ६८, अशोकरथयात्रा । ६९, चतुर्दशयात्राकीर्त्तनं । ७०, अनुक्रमणिका ॥

No. 1562. अन्वयबोधिनी ।

Substance, country-made paper, $12\frac{3}{4} \times 6\frac{1}{2}$ inches. Folia, 33. Lines, 16—18 on a page. Extent, 1,753 s'lokas. Character, Nágara. Date, Sk. 1580. Place of deposit, Calcutta, Government of India. Appearance, old. Prose and verse. Incorrect.

Anvaya-bodhiní. A gloss on S'rídhara Svámí's commentary on that portion of the Bhágavata Puráṇa which contains a hymn by the Devas on the attributes of the Godhead. By Chakrachúḍámaṇi Chakravartí. The hymn is called *Devastuti.*

Beginning. अथ श्रीवेदस्तुतिव्याख्या श्रीधरपूज्यपादैर्या कृता सैव तदनुकूलाधिकपदकदम्बसम्वर्द्धिता व्यक्तार्था यथा स्यात् तथा स्वीयानां सुखप्रबोधाय मयात्र लिख्यते ।

End. यथोपदिष्टं गुरुणा वृद्धौ श्रीनन्दसूनुना ।
तथैव कृतवानस्मि न मे दोषा न मे गुणाः ॥
खाष्टवाणनिशानाथमिते शाके श्रुतिस्मृतेः ।
पूर्णतामनयद् व्याख्यां चूड़ामणिकविः सुधीः ॥

Colophon. इति चक्रचूड़ामणिचक्रवर्त्तिविरचितायामन्वयबोधिन्यां टीकायां सप्ताशीतितमोऽध्यायः ।

विषयः । श्रीमद्भागवतीयवेदस्तुत्यध्यायस्य श्रीधरस्वामिकृतटीकाया व्याख्यानं ।

No. 1563. भगवद्गीताभाष्यं ।

Substance, country-made paper, $12\frac{1}{2} \times 4\frac{3}{4}$ inches. Folia, 159. Lines, 4—6—8 on a page. Extent, 2,782 s'lokas. Character, Nágara Date, Sm. 1782. Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Incorrect.

Bhagavadgítá-bháshya. A commentary on the Bhagavadgítá. By Rámánuja. The work is now in course of publication in a serial form in Calcutta.

Beginning. यत्पादाम्भोरुहध्यानानन्दनिर्वृतचेतसः ।
मुक्तिमप्यवजानन्ति तं वन्दे पुरुषोत्तमं ॥

End. ईश्वरे कर्त्तृतावुद्धिः तत्त्वापादेयतान्तिमे(?) ।
स्वकर्म्मापरिणामस्य शास्त्रमारार्थ उच्यते ॥

Colophon. इति श्रीभगवद्रामानुजविरचिते श्रीभगवद्गीताभाष्ये अष्टादशोऽध्यायः । समाप्तश्चायं ग्रन्थः ।

विषयः । भगवद्गीताव्याख्यानं ।

No. 1564. आधानप्रकरणं ।

Substance, country-made paper, 10 × 4½ inches. Folia, 27. Lines, 8—9 on a page. Extent, 416 s'lokas. Character, Nágara. Date, Sm. 1814. Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Generally correct.

A'dhána-prakaraṇa. A manual for the preservation of the sacred household fire according to the rules of Bodháyana. Anonymous. This is distinct from the work noticed under No. 1344. (vol. III).

Beginning. अथोपव्याहरणं विज्ञायते क्रत्वादौ क्रत्वादौ क्रतुकामं कामयीत यज्ञाङ्गादौ यज्ञाङ्गकाममिति ।

End. अथ पौर्णमासवैश्वधाभ्यां यजते सन्निष्ठतेऽग्न्याधेयं सन्निष्ठतेऽग्न्याधेयं ॥ २२ ।

Colophon. इति बौधायनीसूत्रे आधानप्रकरणं ।

विषयः । क्रत्वादिकर्मप्रारम्भे कर्त्तव्याग्न्याधानविधिः ।

No. 1565. जगन्नाथवल्लभनाटकं ।

Substance, country-made paper, 13½ × 4½ inches. Folia, 21. Lines, 6—7—8 on a page. Extent, 103 s'lokas. Character, Nágara. Date, Sk. 1776. Place of deposit, Calcutta, Government of India. Appearance, new. Prose and verse. Corrected.

Jagannátha-vallabha Náṭaka. A drama on the amatory career of Krishṇa in Vrindávana. By Ráya Rámánanda, a follower of Chaitanya; composed by order of Rájá Pratáparudra of Orissa.

Beginning. स्वराञ्चितविपञ्चिकामुरजवेणुमङ्गीतकं
त्रिभङ्गतनुवल्लरीवलितमुग्धहासोल्वणं।
वयस्यकरतालिकारणितनूपुरैरुज्ज्वलं
मुरारिनटनं सदा दिशतु शर्म लोकत्रये॥ १॥

End. श्रद्धावद्भमतिर्मम प्रतिदिनं गोपाललीलस्य यः
संसेवेत रहस्यमेतदतुलं लीलामृतं लोलधीः।
तस्मिन्भङ्गतमानसे किल कृपादृष्ट्या भवत्या सदा
भावं येन निजेशितां व्रजवने सिद्धिं समाप्नोति सः॥
मद्. । तथास्तु। इति निष्क्रान्ताः सर्वे॥

Colophon. इति श्रीरामानन्दरायकविविरचितं श्रीजगन्नाथवल्लभनाटकं सम्पूर्णम्॥

विषयः। प्रथमे अङ्के। नान्दीपद्यानि। नटीसूत्रधारयोः प्रस्तावनाङ्गीभूतवाक्यैः कथोपकथनं। श्रीकृष्णविदूषकयोर्वृन्दावनवर्णनादिपरवाक्यैः कथोपकथनञ्च।

२ अङ्के। मदनिकाशोकशशिमुखीश्रीकृष्णविदूषकादीनां भावपरीक्षापरवाक्यैः कथोपकथनं।

३ अङ्के। अशोकमञ्जरीमदनिकाराधाशशिमुखीमाधव्यादीनां भावप्रकाशनपरवाक्यैः कथोपकथनं।

४ अङ्के। श्रीकृष्णमदनिकाविदूषकमाधवीराधादीनां कथोपकथनं राधाभिमानश्च।

५ अङ्के। शशिमुखीमदनिकाराधाकृष्णादीनां कथोपकथनं राधामानभङ्गश्च।

गजपतिप्रतापरुद्रादिष्टेन रामानन्दरायेण श्रीराधाकृष्णयोः केलिरत्र नाटकच्छलेन वर्णितः।

No. 1566. आर्य्यभटसिद्धान्तः, वा वृद्धार्य्यभटसिद्धान्तः।

Substance, foolscap paper, 13 × 4 inches. Folia, 8. Lines, 8 on a page. Extent, 160 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, new. Prose and verse. Incorrect.

Áryabhaṭa-siddhánta alias *Vṛiddháryabhaṭa-siddhánta.* A treatise on Hindu astronomy. By Áryábhaṭa. This is a very rare work of considerable age and merit. From the metre of the verses in which the name of the author occurs in this and other works, it is clear that the second word is *bhaṭa* and not *bhaṭṭa* as it is commonly written. The late Dr. Bhau Dájí was the first to notice the fact. CONTENTS: Chapter I. On the determination of time. II. Planets. III. Spheres and astronomical geography.

Beginning. प्रणिपत्यैकमनेकं सत्यां देवतां परं ब्रह्म ।
आर्य्यभट्टः श्रीनिगदति गणितं कालक्रियां गोलं ॥

End. आर्य्यभटीयं नाम्ना पूर्व्वं खपदभूवः सदा नित्यं ।
सुकृतायुषोऽस्य नाशं कुरुते प्रतिकञ्चुकं योऽस्याः ॥ ५० ॥

Colophon. इत्यार्य्यभटसिद्धान्ते गोलपदस्तृतीयः । इति वृद्धार्य्यभटसिद्धान्तः सम्पूर्णः ।

विषयः । अत्र त्रयोऽध्यायाः सन्ति । तत्र १–मे, कालनिरूपणं । २–ये, ग्रहादीनां क्रियानिरूपणं । ३–ये, भूगोलनिरूपणं ।

No. 1567. व्यासिद्धान्तः ।

Substance, foolscap paper, 13 × 8 inches. Folia, 15. Lines, 8 on a page. Extent, 304 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, new. Verse. Incorrect.

Vyása-siddhánta. A treatise on Hindu astronomy. By Vyása. The work professes to be a part of the Dharmas'ástra or Smṛiti of the author. CONTENTS: Chapter I. Spheres and regions of the universe. II. The seven great continents ending in the north in Meru; influence of the planets on the sun; the duration of days and nights in the planets. III. Directions for constructing wooden globes.

Beginning. भवं नारायणं साक्षात् प्रणिपत्य कृताञ्जलिः ।
भक्त्या परमयाभ्यर्च्य पप्रच्छेदमृषिसदा ॥

End. नरयन्त्रं तथा साधु दिवा च विमले रवौ ।
छायां समाधयेत् प्रोक्तकालसाधनमुत्तमं ॥

Colophon. इति श्रीव्यासदेवकृतौ धर्म्मशास्त्रे व्यासस्मृतौ वेदाङ्गमध्ये ज्योतिःशास्त्रे वेदाङ्गमध्ये गोलाध्यायः समाप्तोऽयं ।

विषयः । अत्र त्रयोऽध्यायाः सन्ति । तत्र १–मे, भुवनकोशवर्णनं । २–ये, सप्तद्वीपेषु पूर्व्वादिदिक्षु देवनिर्म्मितनगरीनिरूपणं, सर्व्वेषां वर्षाणामुत्तरतो मेरोः स्थितिकथनं, राशिबलाबलत्वेन रवेर्मीत्रत्वमन्दत्वकथनं, मेषादौ अहोरात्रप्रमाणनिरूपणञ्च । ३–ये, दारुमयभूगोलरचनाप्रणालीकथनं ।

No. 1568. महासिद्धान्तः ।

Substance, foolscap paper, 13 × 4 inches. Folia, 37. Lines, 8 on a page. Extent, 766 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, new. Prose and verse. Incorrect.

Mahá-siddhánta. A treatise on Hindu astronomy. By Ár'yabhaṭa. CONTENTS: Chapter I. True motion of the planets. II. Motion of the planets as determined by Parásara. III. Apparent motion of the planets. IV. Astronomical questions. V. Lunar eclipses. VI. Solar eclipses. VII. Ascending nodes of planets. VIII. Crossing of planets. IX. Ascension of the planets. X. The shadows of planets. XI. Conjunction of planets. XII. Wars of planets. XIII. Paths of planets. XIV—XVI. Astronomical calculations. XVII. The spheres of the universe. XVIII. The terrestrial globe.

Beginning. विविधखगागमपाटीकुट्टवीजादिदृष्टशास्त्रेण ।
आर्य्यभटेन क्रियते सिद्धान्तो रुचिरार्य्याभिः ॥

End. घनयोगमिघनघ्रे(?) पदयोगघनैक्यमशेषकेतौ वा ।
एवं गुणनादीनां शोधनिषेधं मुखो यथोः ॥

Colophon. इति श्रीमदार्य्यभट्टकृते महासिद्धान्ते गोलाध्याये कुटकाध्यायोऽष्टादशः ।
समाप्तोऽयं ।

विषयः । अत्र अष्टादशाध्यायाः सन्ति । तत्र १–मे, ग्रहाणां मध्यगतिवर्णनं । २–ये, पराशरमतसिद्धग्रहगतिवर्णनं । ३–ये, ग्रहाणां स्पष्टगतिवर्णनं । ४–र्थे, प्रश्न, विवरणं । ५–मे, चन्द्रग्रहणनिरूपणं । ६–ष्ठे, सूर्य्यग्रहणनिरूपणं । ७–मे, शृङ्गोन्नतिनिरूपणं । ८–मे, छेद्यकनिरूपणं । ९–मे, ग्रहाणामुदयनिरूपणं । १०–मे, ग्रहच्छायानिरूपणं । ११–शे, ग्रहयुतिनिरूपणं । १२–शे, ग्रहयुद्धनिरूपणं । १३–शे, ग्रहाणां पातनिरूपणं । १४–शे, पठितगणितप्रश्नविवरणं । १५–शे, मध्यमप्रश्नविवरणं । १६–शे, पाटीगणितविवरणं । १७–शे, भुवनकोशनिरूपणं । १८–शे, भूगोलविवरणं ॥

No. 1569. ब्रह्मसिद्धान्तः, शाकलसंहितान्तर्गतः ।

Substance, foolscap paper, 13 × 4 inches. Folia, 38. Lines, 8 on a page. Extent, 788 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, new. Incorrect.

Brahma-siddhánta. A treatise on Hindu astronomy. The work professes to be a part of the S'ákala Sañhitá. CONTENTS : I. Measure of time. II. Relative position of planets. III. Lunar asterisms and moon's age. IV. Ascension and descension of planets. V. Wars of planets. VI. Crossing of the paths of planets.

Beginning. ध्यानयोगासनारूढं ब्रह्माणं त्रिजगद्गुरुं ।
अभिवाद्य सुखासीनो नारदः पर्य्यपृच्छत ॥ १ ॥
देवदेव जगन्नाथ सर्व्वज्ञ कमलासन ।
ज्योतिषां चरितं ज्ञानं ब्रूहि कालाश्रयं महत् ॥ २ ॥

End. न देयं यस्य कस्यापि रहस्यं शास्त्रमुत्तमं ।
एतद्देयं सुशिष्यायान्यूनवत्सरवासिने ॥

Colophon. इति शाकलसंहितायां द्वितीयप्रश्ने ब्रह्मसिद्धान्ते षष्ठोऽध्यायः ॥

विषयः। अत्र षट् अध्यायाः सन्ति । तत्र १–मे, कालनिरूपणं । २–ये, ग्रहाणां उच्चनीचस्थानादिकथनं । ३–ये, तिथिनक्षत्रादिनिरूपणं । ४–र्थे, ग्रहाणामुदयास्तादिकथनं । ५–मे, ग्रहसमागमयुद्धादिकथनं । ६–ठे, छेद्यकादिकथनं ॥

No. 1570. नक्षत्रेष्ट्यादिनानाविधेष्टिः ।

Substance, country-made paper, 8½ × 4 inches. Folia, 17. Lines, 11—12 on a page. Extent, 362 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Incorrect.

Nakshatreshṭádi. Rules for the performance of Ishṭi rites. Anonymous.

Beginning. अथ नक्षत्रेष्टयः । ताश्च पुरोडाशभेदेनादिनिमित्ते आयुष्मत्यः कर्त्तव्या इति नैमित्तिकविधिविषयत्वलाभाय प्रायश्चित्तप्रकरणे बौधायनेनोक्ता अपि काम्या अपि भवन्ति ।

End. नक्षत्रसत्रे कृतानामृत्विजामन्ययजमानस्यार्त्विज्यं निषिद्धं। एवं चातुर्मास्यादि-सर्व्वकर्म्मसु इति प्रदीपः ॥ ६ ॥

Colophon. समाप्तिसूचकवाक्यं नास्ति।

विषयः। नक्षत्रेष्ट्यादिनानाविधेष्टिप्रकरणं ॥

No. 1571. बौधायनीयद्वैधकाण्डं।

Substance, country-made paper, $9\frac{3}{4} \times 4$ inches. Folia, 47. Lines, 12 on a page. Extent, 1,241 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Generally correct.

Baudhayaníya Dvaidhakánḍa. Directions for the performance of various Vedic rites according to the rules of Bodháyana. Anonymous.

Beginning. (तृतीयप्रश्नस्य प्रा०) अग्नीन् पुनराधास्यमानो भवति। तदाहुः। कृतयजुः-सम्भृतसम्भारो भवति।

End. त्तिरण्यं चममं ददाति। राशीकृतं धान्यं ददाति। मरायुकृतं (?) धान्यं ददाति।+त्येतानि च नित्यानि दद्यात्। वो एतान्येवेति शालीकिः।

Colophon. इति बौधायनीये द्वैधकाण्डे पञ्चमः प्रश्नः।

विषयः। अत्र प्रथमद्वितीयप्रश्नौ न स्तः। तृतीये प्रश्ने, अग्न्याधानाङ्गहोमादिकथनं। पिण्डपितृयज्ञकथनं। आग्रयणहोमादिः। उपवसथीयदिवसकृत्यं। अग्निहोत्र-कथनं। अनुयाजेष्टिकथनं। ब्रह्मकर्म्मादिकथनं। पशुवधकर्त्तव्यसङ्क्षेपः। ४, मन्त्रगणाम्नातप्रायश्चित्तानि। ५, वाजपेयकर्त्तव्यतादिः। यजमानविषय-कर्म। राजसूयकर्त्तव्यकर्मादिः। इष्टिकल्पकथनादिः। द्वादशाहकर्त्तव्यादिः।

No. 1572. मित्रविन्देष्टिः।

Substance, country-made paper, $9\frac{3}{4} \times 4$ inches. Folia, 2. Lines, 12 on a page. Extent, 128 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Generally correct.

Mitravindeshṭi. Directions for the performance of the Vedic rite called Mitravindeshṭi. Anonymous.

Beginning. अथ मित्रविन्देष्टिः । श्रीकामो वायुःकामो वा मित्रप्राप्तिकामो वा श्रीपरमेश्वर-
प्रीतिकामो वैतामिष्टिं कुर्य्यात् ।

End. उज्जाती वाचश्छनं(?) यथा दैवतं ब्राह्मणतर्पणान्तं समानं । न पुनरालम्भः ।
सन्निष्ठते मित्रविन्दा महावैराजीष्टिः ॥

विषयः । मित्रविन्देष्टिकथनं ।

No. 1573. शास्त्रसिद्धान्तलेशसङ्ग्रहः ।

Substance, country-made paper, 10½ × 4½ inches. Folia, 126. Lines, 7—11 on a page. Extent, 1,606 s'lokas. Character, Nágara. Date, Sm. 1719. Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Generally correct.

S'ástrasiddhánta-les'a-saṅgraha alias *Siddhántales'a*. An elaborate dissertation on the principal topics of the Vedánta doctrine, in course of which the theories of all the different Vedánta schools, are noticed, and strictures passed on the other schools of Hindu philosophy. By Apya Díkshita, son of Raṅgarája Díkshita. A commentary on this work has been noticed under No. 60 (ante Vol. I, p. 35,) Hall's *Contributions*, p. 153.

Beginning. अधिगतभिदा पूर्व्वाचार्य्यानुपेत्य महस्रधा
सरिदिव महीभेदान् सम्प्राप्य शैरिपदोद्गता ।
जयति भगवत्पादश्रीमन्मुखाम्बुजनिर्गता
जननहरणी सूक्तिर्ब्रह्माद्वयैकपरायणा ॥
प्राचीनैर्व्यवहारसिद्धविषयेष्वात्मैकसिद्धौ परं
सन्नह्यद्भिरनादरात् सरणयो नानाविधा दर्शिताः ।
तन्मूलानिह सङ्ग्रहेण कतिचित् सिद्धान्तभेदान् धियः
शुद्ध्यै सङ्कलयामि तातचरणव्याख्यावचःव्यापितान् ॥
तेषूपपादनापेक्षान् पक्षान् प्रायो यथामति ।
युक्त्योपपादयन्नेव लिखाम्यनतिविस्तरं ॥
तत्र तावदात्मा वा अरे द्रष्टव्यः श्रोतव्य इत्यधीतसाङ्गस्वाध्यायस्य वेदान्तैरापात+
प्रतिपन्ने ब्रह्मणि समुदितजिज्ञासस्य इत्यादि ।

End. निरतिशयानन्दस्फुरणमसद्धनिमं + ब्रह्मपरमेश्वरभावापत्तिरादर्त्तव्येति सिद्ध-
मिति ।

विद्वद्गुरोर्विहितविश्वजिदध्वरस्य श्रीमर्च्चतोमुखमहाव्रतयाजिसूनोः ।
श्रीरङ्गराजमखिनः श्रितचन्द्रमौलेरप्यय्यदीक्षित इति प्रथितस्तनूजः ॥
तन्त्राण्यधीत्य सकलानि सदावदातव्याख्यानकौशलकलाविशदीकृतानि ।
आम्नायमूलमनुरुध्य च सम्प्रदायसिद्धान्तभेदलवसङ्ग्रहमित्यकार्षीत् ॥

Colophon. इति शास्त्रसिद्धान्तलेशसङ्ग्रहे चतुर्थः परिच्छेदः । संवत् १७१९ । चैत्रशुदिः ।
(मध्ये खण्डितमिदं)

विषयः । निखिलवेदान्तप्रकरणानां सिद्धान्तसार सङ्कलय्य निर्म्मितोऽयं ग्रन्थः । तत्र १ प्रथमपरिच्छेदे ।—"आत्मा वा अरे द्रष्टव्यः श्रोतव्यः" इत्यत्र प्रतीयमानो विधिः किं विध इति विवेचनं । अपूर्व्वविधिलक्षणं । नियमविधिलक्षणं । परिसङ्ख्या-लक्षणं । आत्मा वा अरे इत्यत्र अयमपूर्व्वविधिरिति भाष्यानुसारिणां मतकथनं । नियमविधिरयमिति सङ्क्षेपशारीरकानुसारिण इति तन्मतोपपादनं । परि-सङ्ख्याविधिरयमिति वार्त्तिकानुसारिणां नयप्रदर्शनं । नात्र त्रिविधस्यापि विधेः सम्भवः किन्तु कर्म्मकाण्डविचारवद् ब्रह्मकाण्डविचारोऽपि अध्ययनविधिमूल इति वाचस्पतिमिश्रानुयायिनां मतकथनं । जगज्जन्मस्थितिलयकारणत्वरूपं ब्रह्मणो लक्षणत्रयमिति कौमुदीकारमतकीर्त्तनं । एकमेव लक्षणमिदमभिन्ननिमित्तोपा-दानतया अद्वितीयं ब्रह्म उपलक्षयतीत्यन्यमतप्रदर्शनं । परिणामस्वरूपकथनं । विवर्त्तस्वरूपकथनं । शुद्धं ब्रह्मैव जगदुपादानमिति सङ्क्षेपशारीरकमतानुया-यिनां नयप्रदर्शनं । सर्व्वज्ञत्वादिविशिष्टं मायांशवलमीश्वररूपमेव ब्रह्म उपादान-मिति विवरणानुसारिणां मतकथनं । मायाऽविद्ययोर्भेदवादिमतनिरूपणं । तयो-रभेदवादिनां नयकथनं । जीवोपादानवादकथनं । पदार्थतत्त्वनिर्णयकार-मतानुसारेण मायोपादानत्ववादखण्डनं । विवर्त्तपरिणामोपादानद्वयसाधारण-मन्यद् ब्रह्मलक्षणमिति केषाञ्चिन्मतकथनं । उपादानत्वलक्षणं । जीवाश्रितमाया-विषयीकृतं ब्रह्म स्वत एव जाड्याश्रयप्रपञ्चाकारेण विवर्त्तमानतया उपादानमिति वाचस्पतिमिश्रमतकीर्त्तनं । मायाशक्तिरेव उपादानं न ब्रह्मेति मुक्तावलीकारमत-कथनं । ईश्वरलक्षणं । जीवलक्षणं । अत्र प्रकटार्थविवरणकारमतं । तत्त्वविवेक-कारमतं । सङ्क्षेपशारीरकमतकथनं । विद्यारण्यादीनां मतकीर्त्तनं । विश्व-तैजसप्राज्ञादीनां लक्षणकथनं । शङ्करमतेन जीवेश्वरलक्षणनिरूपणं । प्रतिबिम्बे-श्वरवादिनां मतेन पारमार्थिक-व्यावहारिक-प्रातिभासिकभेदात् जीवस्य त्रैविध्य-मुक्त्वा तत्तल्लक्षणकथनं । बिम्बप्रतिबिम्बभावेन जीवेश्वरयोर्विभाग इति विवरणानु-

विषयः । मारिणां सिद्धान्तनिरूपणं । अन्येषां मतेन विद्यादिवादखण्डनपूर्वकमवच्छेदवादस्थापनं । न प्रतिबिम्बो नाप्यवच्छेदो जीवः, किन्तु कौन्तेयस्यैव राधेयत्ववदविकृतस्य ब्रह्मण एव अविद्यया जीवभाव इति केषाञ्चिन्मतकथनं । एकजीववादकथनं । अत्र वाचस्पतिमिश्रतत्त्वकारादीनां मतकथनं । नानाजीववादकथनं । कर्तृत्वस्वरूपनिरूपणं । ईश्वरस्य सर्व्वज्ञत्वसंस्थापनं । अन्तःकरणोपाधिकत्वेन जीवस्य परिच्छिन्नत्वमिति केषाञ्चिन्मतकथनं । जीवस्य किञ्चिज्ज्ञत्वोपपादनं । आवरणविक्षेपशक्तिनिरूपणं । अज्ञानस्वरूपकथनं । अत्र न्यायचन्द्रिकाकारादीनां मतकथनं । जीवात्मपरमात्मनोः साक्षित्वविवेचनं । अन्तःकरणवृत्तिनिरूपणं । अध्यासादिस्वरूपविमर्शनं । द्रव्यादिप्रत्यक्षे कारणकथनं । अपरोक्षज्ञानस्वरूपनिरूपणं । अत्र नानाविधमतकथनं । जीवब्रह्मणोरभेदकथनं ।

२–ये परिच्छेदे ।—अद्वितीये ब्रह्मणि वेदान्तानां समन्वयकथनं । प्रपञ्चस्य सत्यासत्यत्वनिरूपणप्रसङ्गेन विविधवादकीर्त्तनं । (यजमानः प्रस्तरः) इत्यादौ शास्त्रदीपिकान्यायरत्नमालादीनां सिद्धान्तकथनं । घटादिप्रत्यक्षे न्यायसुधाकारादीनां नयकथनं । आकाशे नीलिमभ्रान्तिकारणकथनं । प्रत्यक्षात् श्रुतेः प्राधान्ये भामतीविवरण-वार्त्तिकादीनां मतोपन्यासः । प्रपञ्चस्य असत्त्वस्थापनपुरःसरमसत्त्वलक्षणकथनं । ब्रह्मणि पारमार्थिकसत्यत्वं प्रपञ्चे तु व्यावहारिकसत्यत्वमित्यादि केषाञ्चिन्मतं तत्कथनं । प्रतिबिम्बमिथ्यात्वमभ्युपगच्छतां त्रिविधजीववादिनां विद्यारण्यगुरुप्रभृतीनां मतकीर्त्तनं । प्रतिबिम्बस्वरूपच्छायाया द्रव्यान्तरत्वशङ्कानिरसनं । अज्ञानविक्षेपशक्तिं विहाय आवरणशक्त्यंशमात्रनिवर्त्तकत्वं ज्ञानस्य न स्वाभाविकमित्यन्यमतकथनं । स्वप्ने ज्ञानस्य सूक्ष्मशरीरावयवभूतसूक्ष्मेन्द्रियसन्निकर्षजन्यत्वमिति केषाञ्चिन्मतकथनपूर्व्वकं तत्खण्डनं । सृष्टेर्दृष्टिवादत्वमिति केषाञ्चिदाचार्य्याणां मतकथनं । दृष्टिसृष्टिवादे सृष्टिदृष्टिवादे च चित्सुखाचार्य्य–रामाद्याचार्य्यप्रभृतीनां मतकथनं । अद्वैतदीपिकानुसारेण मिथ्यात्वलक्षणकीर्त्तनं । उपाधिस्वरूपकथनं । आत्मनोऽणुपरिमाणवत्त्ववादखण्डनपूर्व्वकं विभुत्वसंस्थापनं ।

३–ये परिच्छेदे ।—कर्म्मणां ब्रह्मप्राप्तिहेतुत्ववादखण्डनपूर्व्वकं विद्यायास्तत्प्राप्तिहेतुत्वसंस्थापनं । अत्र भामतीकारविवरणकारादीनां मतकथनं । कर्म्मणां चित्तशुद्धिद्वारा विद्योपयोगित्वकथनं । शूद्रस्यापि विद्यार्थं कर्म्माधिकारनिरूपणं । केषाञ्चिन्मतेन क्षत्रियवैश्ययोरपि ब्राह्मणवत् सन्न्यासाधिकारनिरूपणं । ब्रह्मसंस्थस्यैव श्रवणादिषु मुख्यः अधिकार इति केषाञ्चिन्मतकथनं । अत्र नानाविधमतोपन्यासः । निर्गुणस्य ब्रह्मण उपासना नास्तीति शङ्कानिरसनं । ब्रह्मसाक्षात्कारे नानाविधमतकथनं । जीवन्मुक्तिनिरूपणं । अत्र नानाविधमतकथनं ।

४-र्थे परिच्छेदे ।—अविद्यालेशानुवृत्त्या जीवन्मुक्तिरिति मति सिद्धान्ते तदविद्यालेशस्वरूपनिरूपणं । अत्र विविधवादकथनं । अपवर्गकारणादिनिरूपणप्रसङ्गेन नानामतकथनं । मुक्तस्य ईश्वरभावापत्तिकथनं । अत्र नानाविधमतकीर्त्तनं ।

No. 1574. बौधायनचातुर्मास्यसूत्रं ।

Substance, country-made paper, 8¾ × 4¼ inches. Folia, 14. Lines, 12 on a page. Extent, 300 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Incorrect.

Baudháyana-cháturmásya Sútra. The aphorisms of Bodháyana on the Quadrimensial rite, being a part of the author's Kalpa Sútra.

Beginning. ॐ वैश्वदेवहविर्भिर्यज्यमाणो भवति फाल्गुन्यां वा चैत्र्यां वा पौर्णमास्यां नक्षत्रप्रयोग इत्येक आऽऽरुद्गयन आपूर्य्यमानपक्षस्य पुण्याहे प्रयुञ्जीतेति ।

End. हवीꣳष्यनुवत्सरीणाꣳ सस्मिमाग्नस्य इत्याग्नस्ते ।

Colophon. इति बौधायनीयचातुर्मास्यसूत्रं सम्पूर्णं ।

विषयः । चातुर्मास्ययागप्रकरणं ।

No. 1575. निविद्प्रउगाध्यायौ ।

Substance, country-made paper, 10 × 4½ inches. Folia, 8. Lines, 10 on a page. Extent, 135 s'lokas. Character, Nágara. Date, Sm. 1814. Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Generally correct.

Nivid and *Prayüga.* The initials of the Nivid and Prayüga mantras.

Beginning. निविदाध्यायः । अग्निर्देवेद्धः । अग्निः सुसमित् । होता देवहतः । होता मनुहतः (?) । त्रणीर्यज्ञानां ।

End. विश्व आसोमपीतयः । वाचमद्यं देवीं वाचास्मिन् यज्ञे सुपेशसा । सरती हवामहे ।

Colophon. इति प्रउगाध्यायः ॥

विषयः । निविद्प्रउगकर्मकथनम् ।

No. 1576. आश्वलायनीयं प्रायश्चित्तं ।

Substance, country-made paper, $9\frac{1}{4} \times 4\frac{1}{4}$ inches. Folia, 10. Lines, 12 on a page. Extent, 285 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Generally correct.

A's'valáyanía Práyas'chitta. An exposition of As'valáyana's chapter on expiations for errors and accidents occurring in course of performing Vedic rites. The codex is incomplete and the author's name cannot be made out.

Beginning. अथाश्वलायनीयं । आहवनीये विद्यमाने यदि गार्हपत्योनुगच्छेत् । अवत्तामेध्यो मन्यनं कृत्वा हवनीयोऽनुगमयितव्यः ।

End. इति सिद्धान्तभाष्ये । ऋत्विजामेक इति सूत्रात् । प्रपञ्चितमिति दिक् ।

Colophon. (परिसमाप्तिवाक्याभावात् खण्डितमिति भाति ।)

विषयः । वैदिककर्मणामङ्गवैकल्ये तत्र कर्त्तव्यप्रायश्चित्तविशेषाः ।

No. 1577. मीमांसावार्त्तिकं ।

Substance, country-made paper, $10\frac{1}{2} \times 4\frac{1}{2}$ inches. Folia, 113. Lines, 6—9—10 on a page. Extent, 2,475 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Generally correct.

Mímáñs'á-vártika. A commentary on the Mímáñs'á aphorisms of Jaimini. By Kumárila Bhaṭṭa. The MS. is incomplete; the work is in course of publication in the Bibliotheca Indica. Hall's *Contributions*, p. 170.

Beginning. द्रव्यसंस्कारकर्मसु परार्थत्वात् फलश्रुतिरर्थवादः । अपायस्तोकार्थिन उपायमन्विच्छतः पर्णमयीत्वमुपायत्वेन विधीयते ।

End. अपि च गुणवचनोऽयं स यदा द्रव्ये उपसर्जनीभूतः तदा द्रव्यस्य यल्लिङ्गसङ्ख्ये तल्लभते । इह (खण्डितं)

विषयः । मीमांसासूत्रव्याख्यानं । अत्र चतुर्थाध्यायतृतीयपादावधि दशमाध्यायकतिपयपर्य्यन्तं वर्त्तते ।

No. 1578. नाममाला, वा शीघ्रबोधिनी ।

Substance, country-made paper, 10 × 5 inches. Folia, 19. Lines, 12 on a page. Extent, 472 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old, decayed. Verse. Correct.

Námamálá alias *S'ighrabodhiní*. A metrical Lexicon in four parts. By Puṇḍaríka Viṭṭhala, of the Kármáṭha (?) caste. The first part gives the names of the different parts of the body, and also of all things and attributes of women; the second, inanimate objects, mountains, trees, &c.; the third is devoted to celestial objects; and the fourth to words of several meanings, synonyms, prepositions, names of arts, sciences, &c.

Beginning. गणेशं भारतीं नत्वा श्रीमद्विट्ठलसूरिणा ।
शीघ्रबोधिनिका नाम क्रियते नाममालिका ॥
चतुःकाण्डमिता रम्या षष्ट्या सह चतुःशती ।
कवेः शीघ्रकवित्वाय श्रोतुर्बुद्धिसमृद्धये ॥
देहं तत्सकलाङ्गानि नारीणां जातिभेदकाः ।
सौन्दर्य्यं वस्त्रमाकल्पहावभावरसादिकाः ॥

End. इत्येवं बालबोधार्थं किञ्चित् किञ्चित प्रकाशितं ।
किन्त्वत्रादृष्टमन्यत्र दृश्यतां साद्नोत्तमैः ॥
यावद्धरिकथावाणी सिन्धुरिन्दुरवी दिशः ।
भूमौ तिष्ठतु तावत्तु नाममालापि वैट्ठली ॥

Colophon. इति श्रीकार्म्माटजातीयपुण्डरीकविट्ठलकृतौ शीघ्रबोधिनीनाममालायामनेकार्थ-काण्डश्चतुर्थः । समाप्तेयं शीघ्रबोधिनी नाममाला ।

विषयः । १ प्रथमे शृङ्गारकाण्डे,—नारीनां देहसौन्दर्य्यवेशहावभावादीनां नामकथनं ।
२-ये राजकाण्डे,—भू-गिरि-वृक्षसङ्ग्रामादीनां नामकथनं ।
३-ये दैवकाण्डे,—आकाशपूर्णिमादिनरात्रिस्वर्गसुरादीनां नामकीर्त्तनं ।
४-र्थे नानार्थकाण्डे,—नानार्थशब्दकथनं । अव्ययानामर्थकथनं । चतुर्द्दशवि-द्याचतुःषष्टिकलादीनां नामकथनञ्च ।

No. 1579. लेशसङ्ग्रहः, वा मीमांसालेशसङ्ग्रहः ।

Substance, country-made paper, 10½ × 3½ inches. Folia, 40. Lines, 9 on a page. Extent, 1,175 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, very decayed. Prose. Correct.

Mímáṅsá-les'a-saṅgraha alias *Les'a-saṅgraha.* A commentary on the *S'ástra-siddhánta-les'a* of Apya Díkshita. By Dharmaya Díkshita, a disciple of the author. Mr. Hall notices a commentary on the text by Achyuta Kṛishṇánanda Tírtha, disciple of Svayamprakás'a Sarasvati, (*Contributions*, p. 153,) and a third has been described under No. 60 (vol. I, p 35). The text occurs under No. 1573.

Beginning. उपासकानामचिराद् वाञ्छितार्थप्रदायिने ।
ढुण्ढये वाङ्मनःकायैर्नमः साम्बशिवाय च ॥
गुरुमप्ययज्वानं नत्वा धर्म्मयदीक्षितः ।
तद्वचःस्थापितार्थेषु तनुते लेशसङ्ग्रहं ॥
यज्ञादिकर्म्मभिर्नित्यैः शुद्धान्तःकरणो द्विजः ।
जिज्ञासते त्वां विश्वेशत्वत्पदाम्भोजचिन्तकः ॥
ननु यज्ञादिकर्म्मणां स्वर्गादिसाधनानां ।

End. सूत्रार्थः मर्म्मोऽपि विषयवाक्येऽस्मिन् निबद्ध एव । तथा हि,——

Colophon. इतः परं लिप्यभावात् परिसमाप्तिवाक्यं नास्ति ।

विषयः । अप्ययदीक्षितकृतशास्त्रसिद्धान्तलेशसङ्ग्रहाभिधानग्रन्थस्य व्याख्यानं ।

No. 1580. प्रायश्चित्तसङ्क्षेपः ।

Substance, palm-leaf, 14½ × 1½ inches. Folia, 36. Lines, 4 on a page. Extent, 522 s'lokas. Character, Bengali. Date, Sk. 1611. Place of deposit, Calcutta, Government of India. Appearance, old. Prose and verse. Correct.

Práyas'chitta-saṅkshepa. A summary of the rules on expiations for sins of all kinds. By Chintámaṇi Nyáyálaṅkára Bhaṭṭáchárya.

Beginning. अथ प्रायश्चित्तव्यवस्था । तत्रादौ प्रायश्चित्तलक्षणं । तथा च हारीतः,——
प्रयतत्वाद्वापचितमशुभं नाशयतीति प्रायश्चित्तं ।

End. बालाद्भोजनविषयं ग्रामान्नविषयं वा—इति शूलपाणिः।

Colophon. इति गौड़देशनिवासिश्रीचिन्तामणिन्यायालङ्कारभट्टाचार्य्यकृतौ प्रायश्चित्त-सङ्क्षेपः समाप्तः। शकाब्दाः १६११।

विषयः। प्रायश्चित्तलक्षणं। अतिपातकमहापातकानुपातकोपपातकनिरूपणं। एषां प्रायश्चित्तकथनञ्च। पतितसंसर्गप्रायश्चित्तं। गोवधप्रायश्चित्तं। बाल्यादिभेदेन प्रायश्चित्तव्यवस्थानिरूपणं। ज्ञानकृतादिनिरूपणं। ब्राह्मणस्वामिकादिगोवध-प्रायश्चित्तं। एकहायन्यादिगोवधप्रायश्चित्तं। रोधादिनिमित्तकगोवधप्रायश्चित्तं। अस्थिभङ्गादिप्रायश्चित्तं। अपालनादिनिमित्तगोवधप्रायश्चित्तं। गोवधापवादः। क्षत्रियादिवधप्रायश्चित्तं। स्त्रीवधप्रायश्चित्तं। गर्भवधप्रायश्चित्तं। मार्ज्जारवधप्राय-श्चित्तं। मत्स्यादिवधप्रायश्चित्तं। मण्डपोद्यानादिभङ्गप्रायश्चित्तं। देवागारादि-भेदनप्रायश्चित्तं। अभिचारप्रायश्चित्तं। अभक्ष्यभक्षणप्रायश्चित्तं। शूद्रान्नभक्षण-प्रायश्चित्तं। चर्व्वितताम्बूलादिभक्षणप्रायश्चित्तम्।

No. 1581. विश्वप्रकाशः।

Substance, country-made paper, 9 × 3½ inches. Folia, 133. Lines, 8 on a page. Extent, 2,112 s'lokas. Character, Nágara. Date, Sk. 1619. Place of deposit, Calcutta, Government of India. Appearance, old. Verse. Generally correct.

Vis'vaprakás'a. A dictionary of the Sanskrit language. By Mahes'vara. The author is best known by his title of Rájas'ekhara. Vide Wilson's Miscellaneous Essays, III.

Beginning. स्तुवीमहि महत्क्लेशमोहान्धकभिषग्वरं।
वैधातुकनिदानज्ञं सर्व्वज्ञं दुःखहायने॥
कलाविलासान्मकरन्दविन्दुमुद्राविनिद्रे हृदयारविन्दे।
या कल्पयन्ती रमते कवीनां देवीं नमस्यामि सरस्वतीं तां॥
कवीन्द्रकुमुदानन्दकुन्दो+सत्सुधाकरं।
वाचस्पतिमतिस्पर्द्धिश्रेमुषीचन्द्रकोज्ज्वलं॥
क्षुभ्यत्क्षीराब्धिकल्लोलमालोल्लासियशःश्रियं।
गुरुं वन्दे जगद्वन्द्यं गुणरत्नैकरोहणं॥
श्रीसारसाकन्दपतेरनवद्यविद्यवि+तरङ्गपदमव्ययमेव विभ्रत्।
यश्चन्द्रचारुचरितो हरिचन्द्रनामा स्वव्याख्यया चरकतन्त्रमलञ्चकार॥

आमोदमोमवसुधाधिपवन्दनीये तस्यान्वये सकलवैद्यकुलावतंसः ।
शक्रस्य द(?) + इव गाधिपुराधिपस्य श्रीकृष्ण इत्यमलकीर्त्तिलतावितानः ॥
सङ्कल्पसङ्ग + + + + + + + जल्पकल्पानलाकुलितवादिसहस्रमिश्रः ।
तर्कत्रयत्रिनयनस्तनयो यदीयो दामोदरः समभवद्द्विपजां वरेण्यः ॥
तस्याभवत् सूनुरुदारवाचो वाचस्पतिश्रीललनाविलासी ।
सद्वन्द्यविद्यानलिनीदिनेशः श्रीमहेशः सत्कुमुदाकरेन्दुः ॥
यद्भ्रातृजः सकलवैद्यकतत्त्वरत्नरत्नाकरश्रियमवाप्य च केशवोऽभूत ।
कीर्त्तेर्निकेतनमनिन्द्यपदप्रमाणवाक्यप्रपञ्चरचनाचतुराननश्रीः ॥
कृष्णस्य तस्य च सुतः स्मितपुण्डरीक + + तपत्रपरभागयशःपताकः ।
श्रीब्रह्म इत्य + + + मुखारविन्दसोल्लासलासितरसाद्रसरस्वतीकः ॥
तस्यात्मजः सरसकैरवकान्तकीर्त्तिः श्रीमन्महेश्वर इति प्रथितः कवीन्द्रः ।
निःशेषवाङ्मयमहार्णवपारदृश्वा शब्दागमाम्बुरुहषण्डरविर्बभूव ॥
यः साहसाङ्कचरितादिमहाप्रबन्धनिर्म्माणनैपुणगुणागतगौरवश्रीः ।
यो वैद्यकत्रयसरोजसरोजबन्धुर्बन्धुः सतां च कविकैरवकाननेन्दुः ॥
इयं कृतिस्तस्य महेश्वरस्य वैदग्धसिन्धोः पुरुषोत्तमानां ।
देदीप्यतां हृत्कमलेषु नित्यमाकल्पमाकल्पितकौमुदश्रीः ॥
लब्धैः कथञ्चिदभिजातसुवर्णकारैः + + न केशशतरत्नधिशब्दरत्नः ।
विश्वप्रकाश इति काञ्चनबन्धुशोभां विभ्रन्मयात्र घटितो मुखखण्ड एषः ॥

— — — — — — — — —

भोगीन्द्रकात्यायनसाहसाङ्कवाचस्पतिव्याडिपुरःसराणां ।
स विश्वरूपामरमङ्गलानां शुभाङ्कवोपालितभाण्डरीणां ॥
कोशावकाशात् प्रकटप्रभावः सम्भावितानर्थगुणः स एषः ।
सम्पादयन्नेष्यति वाञ्छितार्थान् कथं न चिन्तामणीनां कवीनां ॥

End. एताह + कृतधियः कृतकृत्यभावमापादयन्तु सदयं मदयन्तु चेतः ।
नित्यं महेश्वरकवेः परिभावयन्तो वाचः परो + निरसाहि(?) भवन्तु लोके ॥

Beginning. नमामि वाचामधिदेवतां तां त्रिलोकनाथैकनिकेतनस्थां ।
प्रसादमासाद्य यदीयमेव वागीश्वरस्यापि कवित्वशक्तिः ॥
अस्त्येव सम्प्रति महाकविभिः प्रणीता नानार्थबोधमधुरा विवृतिस्त्वनेका ।
तेषां तदत्र तुलना न तथा ममैषा खद्योतकीटतुलनैव यथेन्दुकान्तेः ॥
वक्तुं सुधीरपि गुरूननुपास्य यस्य शक्नोति किञ्चिदपि नैव रहस्यमस्य ।
काव्ये श्रमोऽत्र विदुषो कविपण्डितस्य मोहाय किन्नु मम सम्प्रति बालकस्य ॥
तथापि बाल्याच्चपलत्वमुच्चैरस्य प्रवृत्तोऽस्मि विधातुमेतत् ।

+ + + + + विधुरोऽपि काव्ये बालस्य किं कृत्यविधौ विचारः ॥

निपीय इति ।

End. विजयसेननाम्नो गौड़ेश्वरस्य प्रशस्तिरचनायास्तातस्य श्रीहर्षकवेः काव्यस्य नैषधस्य चरिते पञ्चमः सर्गोऽगमत् । पञ्चानां पूरणः पञ्चमः । पुरुहूतस्य कैतवं कपटो यत्र सर्गे ।

Colophon. इति गोपीनाथाचार्य्यकृतौ हर्षहृद्याख्यायां नलचरितटीकायां पञ्चमः सर्गः ।

विषयः । श्रीहर्षकृतनैषधचरिताभिधानकाव्यस्य पञ्चमसर्गान्तं यावद् व्याख्यानं ।

No. 1640. धातुपारायणः ।

Substance, country-made paper, 16 × 4 inches. Folia, 17. Lines, 8 on a page. Extent, 426 s'lokas. Character, Bengali. Date, ? Place of deposit, Bhímagaḍa, Post Khayarás'úla, Zilla Vírabhúma, Vámácharaṇa Bhaṭṭáchárya. Appearance, new. Prose. Incorrect.

Dhátupáráyaṇa. The classification and conjugation of the Sanskrit roots. By Jumaranandi, the author of the exposition of the aphorisms of the Sańkshiptasára grammar. The work is intended to serve as an appendix to his grammar.

Beginning. धातवोऽतिप्रसिद्धा ये पठ्यन्ते च गणे गणे ।

तेषामेव निबन्धोऽयं शिष्यूनां प्रतिपत्तये ॥ तत्रादौ भ्वादिगणः ।

End. प्रोष्ठखालयति अवगुण्ठालयति अवधीरयति । इत्यादिः ।

Colophon. इति श्रीमज्जुमरनन्दिकृतौ धातुपारायणः समाप्तः ।

विषयः । भ्वादिगणादिधातुनिरूपणं ।

No. 1641. भागवतकौमुदी ।

Substance, country-made paper, 13 × 4 inches. Folia, 22. Lines, 16 on a page. Extent, 1,512 s'lokas. Character, Bengali. Date, ? Place of deposit, Bhímagaḍa, Post Khayarás'úla, Zilla Vírabhúma, Gopálachandra Vidyálaṅkára. Appearance, old. Prose. Incorrect.

Bhágavata-kaumudí. Notes on some difficult passages on the Bhágavata Puráṇa. By Rámakṛishṇa. The MS. is incomplete.

Beginning. प्रणम्य परमं ब्रह्म दुरूहार्थस्वरूपिणा ।
तन्यते रामकृष्णेन श्रीभागवतकौमुदी ॥
अथ तमेव विदित्वा इति श्रुतौ परमपुरुषार्थे मोक्षं प्रति तत्त्वज्ञानस्य हेतुता दर्शिता ।

End. अतो विप्रस्य प्रमाणमयत्वेन प्रमेयात् मत्तः श्रेष्ठत्वं ॥ श्रीः ।

विषयः । श्रीमद्भागवतीयविषमस्थाने विघटनपूर्वकं तत्र तत्र समाधानकीर्त्तनं ।

No. 1642. स्मृतिसारः ।

Substance, palm-leaf, 19 × 1¼ inches. Folia, 107. Lines, 3 on a page. Extent, 1,590 s'lokas. Character, Bengali. Date, Sk. 1610. Place of deposit, Mayanádal, Post Khayarás'úla, Zilla Vírabhúma, Vishṇuchandra Bhaṭṭáchárya. Appearance, very old. Prose. Correct.

Smṛitisára. An epitome of the Smṛitis. The MS. is confined to expositions for omissions and irregularities in the performance of ceremonies, and for offences and sins. By Yádava Vidyábhushaṇa Bhaṭṭáchárya. The author belongs to the school of Raghunandana. Nos. 649 and 1077 bear the name of this work, but they are separate works.

Beginning. भूयः प्रणम्य रघुनाथपदारविन्दं मन्वादितन्त्रनिवहानभिवीक्ष्य यत्नैः ।
उद्धृत्य सारमखिलं निखिलस्मृतीनां श्रीयादवेन विदधे स्मृतिसार एषः ॥
अथ प्रायश्चित्तनिरूपणं । पापक्षयमात्रसाधनं कर्म्म प्रायश्चित्तमिति तच्चिन्त्यं ।

End. श्राद्धदिने स्त्रीगमने अहोरात्रमभोजनं । दिवामैथुने दिनमेकं व्रती भवेदिति ।

Colophon. इति श्रीमहामहोपाध्यायस्मार्त्तानुयायिश्रीयादवविद्याभूषणभट्टाचार्य्यविरचितस्मृतिसारे प्रायश्चित्तप्रकरणं समाप्तं । शकाब्दाः १६१०

विषयः । प्रायश्चित्तनिरुक्तं । प्रायश्चित्तपूर्व्वाहकृत्यं । गोवधप्रायश्चित्तनिरूपणं । अवस्थापत्रलेखनप्रकारः । एकहायनादिगोवधप्रायश्चित्तं । गोवधापवादः । क्षत्रियादिगोवधप्रायश्चित्तं । स्त्रीवधप्रायश्चित्तं । व्यभिचारिणीवधप्रायश्चित्तं । गर्भिणीवधप्रायश्चित्तं । धेनुमङ्कलनकथनं । चण्डालाद्यन्नभक्षणप्रायश्चित्तं । चण्डालादिस्पृष्टान्नभोजनादिप्रायश्चित्तं । अज्ञानतः कुक्कुराद्युच्छिष्टभोजनप्रायश्चित्तं । अन्त्यजस्त्रीगमनप्रायश्चित्तं । शूद्रादिस्पृष्टान्नकेशकीटाद्युपहतान्नादिभोजनप्रायश्चित्तं । गोमांसभक्षणप्रायश्चित्तं । रेतोमूत्रपुरीषादिभक्षणप्रायश्चित्तं । विण्मूत्रदूषितफलादिभक्षणप्रायश्चित्तं । म्लेच्छभक्षणप्रायश्चित्तं । पतितान्नभोजनप्रायश्चित्तं । देवा-

र्थोपकल्पितदशापायसभोजनप्रायश्चित्तं । वाग्दुष्टादिभोजनप्रायश्चित्तं । शूद्र-भाजने तथा भिन्नकांस्यभाजने भोजनप्रायश्चित्तं। सूतकाद्यन्नभोजनप्रायश्चित्तं। हसदत्तादिष्टतभोजनप्रायश्चित्तं । भोजनकाले रेतोमूत्रपुरीषाद्युत्सर्गप्रायश्चित्तं। क्षततैलाभ्यङ्गस्य भोजनादिप्रायश्चित्तं । स्वकीयोच्छिष्टादिभोजनप्रायश्चित्तं। कुत्सितपङ्क्तिभोजनप्रायश्चित्तं। ब्रह्मवधसुरापानादिमहापातकप्रायश्चित्तं। क्षत्रि-यादिस्वामिकसुवर्णस्तेयादिप्रायश्चित्तं। पतितसंसर्गप्रायश्चित्तं। चण्डालादिसंसर्ग-प्रायश्चित्तं। यज्ञोपवीतच्छेदादिप्रायश्चित्तं। अनातुरस्य सन्ध्याद्यकरणप्रायश्चित्तं। शूद्रपरिग्रहप्रायश्चित्तं। मिथ्याभाषणप्रायश्चित्तं। स्वभार्य्यायां मातृभगिन्यादि-कथनप्रायश्चित्तं। उच्छिष्टस्य चण्डालादिदर्शनप्रायश्चित्तं। विप्रादिमध्यगमन-प्रायश्चित्तं। मिथ्याशपथप्रायश्चित्तं। अभिशापकर्त्तुः प्रायश्चित्तं। जलाग्न्यादौ अशुचिप्रक्षेपप्रायश्चित्तं। देवाभावे इष्टकादिना स्वगृहकरणप्रायश्चित्तं। ष्ठीवन-प्रायश्चित्तं। व्रतभङ्गप्रायश्चित्तं। रजकादिस्पर्शप्रायश्चित्तं। उच्छिष्टब्राह्मणस्य शूद्र-स्पर्शनप्रायश्चित्तं। सवर्णोच्छिष्टस्पर्शप्रायश्चित्तं। लशुनादिस्पर्शप्रायश्चित्तं। उच्छि-ष्टस्य नरादिपुरीषस्पर्शप्रायश्चित्तं। रजस्वलास्पर्शप्रायश्चित्तं। प्रायश्चित्तसङ्क्षेपः। व्रात्यप्रायश्चित्तकथनञ्च ।

No. 1643. सूर्य्यशतकटीका ।

Substance, palm-leaf, 14 × 1½ inches. Folia, 42. Lines, 4 on a page. Extent, 976 s'lokas. Character, Bengali. Date, Sk. 1623. Place of deposit, Bhímagaḍa, Post Khayarás'úla, Zilla Vírabhúma, Vámácharaṇa Bhaṭṭáchárya. Appearance, old. Prose. Correct.

Súryas'ataka-ṭiká. A commentary on Mayúra Bhaṭṭa's century of verses in praise of the Sun. By Jayamaṅgala. The hymn is believed to possess the merit of curing leprosy.

Beginning. भक्तमयूरवक्त्राब्जपदविन्यासशालिनी ।
नर्त्तकीव नरीनर्त्ति सभामध्ये सरस्वती ॥ जम्भेत्यादि ।

End. तावद् यो निर्णीयते स आदित्यः भवद्भ्योऽभीष्टं ददात्विति ॥ १०० ॥

Colophon. इति श्रीमयूरभट्टविरचितसूर्य्यशतकस्य टीका जयमङ्गलविरचिता समाप्ता ।
शाकेऽनन्तर्त्तुविमिते सपक्षवह्निके पुनः ।
लिखिता सूरशतके टीकासौ यत्नपूर्व्विका ॥

विषयः । मयूरभट्टकृतसूर्य्यशतकस्य व्याख्यानं ।

No. 1644. वैषम्योद्धरणी ।

Substance, country-made paper, 15 × 3 inches. Folia, 67. Lines, 9 on a page. Extent, 2,939 s'lokas. Character, Bengali. Date, Sk. 1594. Place of deposit, Bhímagaḍa, Post Khayarás'úla, Zillá Vírabhúma, Gopálachandra Vidyálaṅkára. Appearance, old. Prose. Correct.

Vaishamyoddharaṇí. A commentary on the Kirátárjuníya. By Vaṅkimadása. A little-known work.

Beginning. अथ वङ्किमदासेन प्रणम्य परमेश्वरीं ।
वैषम्योद्धरणी काव्ये भारवीये विधीयते ॥
काव्यं कुर्व्वन् कविस्तत्तत्तणं वस्तुनिर्द्देशं निदघान आह,—त्रिय इति ।

End. त्रिया लोकान्तरसम्बन्धिन्या स्वतेजःसम्पदा च उपजगुः उपगीतवन्तः स्तुतवन्त इत्यर्थः ।

Colophon. इति वङ्किमदासकविराजकृतायां वैषम्योद्धरण्यां किरातार्ज्जुनीयटिप्पन्यामष्टादशः सर्गः ।
त्रह्मास्यग्रहचन्द्रशेखरमुखत्तौणीमिते भूपतेः
शाके कार्तिकमञ्जके शनिदिने मासे मितायां तिथौ ।
अष्टम्यां लिखिता सुबोध-विषमा टीका मुदा भारवेः
श्रीदामोदरशर्म्मणा सुरवरं नत्वा हरिं कामदं ॥

विषयः । किरातार्ज्जुनीयकाव्यस्य व्याख्यानं ।

No. 1645. क्रमदीपिका ।

Substance, palm-leaf, 19 × 1½ inches. Folia, 75. Lines, 3 on a page. Extent, 908 s'lokas. Character, Bengali. Date, Sk. 1609. Place of deposit, Bhímagaḍa, Post Khayarás'úla, Vámácharaṇa Bhaṭṭáchárya. Appearance, old. Verse. Correct.

Kramadípiká. A second copy of the work noticed under No. 1552. A Tántric compilation of details regarding the secret mantras of Vaishṇava deities.

Beginning. कला तु माया नवका तु मूर्त्तिः कलक्वणद्वेणुनिनादरम्यः ।
त्रिता हृदि व्याकुलयंस्त्रिलोकीं त्रियऽस्तु गोपीजनवल्लभो वः ॥
गुरुचरणसरोरुहद्वयोत्थान् महितरजःकणकान् प्रणम्य मूर्ध्ना ।
गदितमिह विरच्य नारदाद्यैर्यजनविधिं कथयामि शार्ङ्गपाणेः ॥

End. जगदिदमनुविद्धं येन यस्मिन् प्रसूते
यदनु ततमजस्रं याति चाधिष्ठिताया(?)।
यदुरुमहदुदर्चिर्यो विधत्ते च गोपीं
तममितसुखबोधज्योतिषं नौमि कृष्णं॥

Colophon. इति श्रीक्रमदीपिकायामष्टमः पटलः। समाप्तश्चायं ग्रन्थः। शकाब्दाः १६०९।

विषयः। १ प्रथमपटले,—गोपालमन्त्रस्य सर्व्ववर्णस्त्रीपुरुषेषु शीघ्रफलदातृत्वकथनपूर्व्वकं तन्मन्त्रादिनिरूपणं। आसनभूतशुद्धादिकथनं। केशवकीर्त्त्यादिन्यासप्रकारः। द्वारदेवताकथनं। तत्त्वन्यासादिप्रकारकथनं। प्राणायामप्रकारः। पीठन्यासादिकथनं।

२ये,—फलकथनपूर्व्वकं 'गोपीजनवल्लभाय स्वाहा' इति मन्त्रोद्धारप्रकारकथनं। अत्र छन्दऋष्यादिनिरूपणं। प्रद्युम्नजगन्मोहनमन्त्रशक्तिनिरूपणं। मन्त्रार्थनिरूपणं। कृष्णशब्दनिर्व्वचनं। तत्त्वदशकन्यासनिरूपणं। गृहिवनवासिप्रभृतीनां न्यासभेदकथनं। भूतिन्यासकथनं। विभूतिपञ्जरकथनं। वर्णन्यासादिनिरूपणं। नाराचादिमुद्रानिरूपणं।

३, ४र्थे,—श्रीकृष्णध्यानकथनं। श्रीकृष्णस्य ध्यानमालाकथनं। नारदस्य ध्यानकथनं। विशेषार्घ्यस्थापनादिविधिः। जपप्रकारकीर्त्तनं। शिष्यलक्षणं। दीक्षाविधानं। अत्र कलशादिस्थापनविधिः। अङ्गदेवताध्यानादिकथनं। रुक्मिण्यादीनां रूपादिकथनं। बलदेवस्य ध्यानं। सुभद्राया ध्यानं। विशेषार्घ्यदानमन्त्रादिकथनं।

५, ६ष्ठे,—दीक्षितस्य कर्त्तव्यतानिरूपणं। मन्त्रजपस्थानादिनिरूपणं। परश्चरणकथनं। तदुपसंहारनिरूपणं। श्रीकृष्णस्य प्रातःकालीनध्यानकथनं। मध्याह्नध्यानकथनं। सायाह्नध्यानकथनं। तर्पणविधिः। पायसादिषोड़शद्रव्यनिरूपणं। श्रीकृष्णमन्त्रनिर्म्माणप्रकारकथनं। शक्ति-माया-लक्ष्मीबीजायुद्धारप्रकारः। सिद्धमन्त्रप्रयोगः। विविधमन्त्रोद्धारप्रकारः। तत्र तत्र ध्यानकथनं। प्रत्येकं परश्चरणकथनं। उच्चाटनादौ मन्त्रादिनिरूपणं। जयकामादौ होमादिविधानं।

७, ८मे,—श्रीकृष्णस्य चतुर्व्वर्गसाधनध्यानकथनं। विंशत्यक्षरमन्त्रेण पूजाविधानं। अष्टचत्वारिंशदक्षरादिश्रीकृष्णमन्त्रनिरूपणादिकं। अष्टनिधिपूजा। राजोपचारकथनं। विविधमन्त्रकथनं। तत्र तत्र ध्यानादिकथनञ्च। गौर्य्यादौ पूजाविशेषकथनं। सिद्धमन्त्रस्य वश्यादिविधिः। स्त्रीवशीकरणादिकथनं। मुमुक्षूणाम् प्रक्रियानिरूपणं। त्रैलोक्यमोहनमन्त्रकथनं। ध्यानकथनं। गरुड़मन्त्रकथनं। मोहनगायत्रीकथनं। आत्मार्च्चनकथनं। योगकथनं। तत्फलकथनञ्च। चक्रबन्धश्लोकमध्ये केशवेति ग्रन्थकर्त्तृनामोल्लेखनं॥

No. 1646. शालहोत्र ।

Substance, country-made paper, 9 × 4¼ inches. Folia, 41. Lines, 7 on a page. Extent, 375 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Incorrect.

S'álahotra. A Hindi translation of a treatise on the Veterinary Art. The original is ascribed to Nakula, one of the Páṇḍava brothers. The translator was one Chetana. The Sanskrit original is supposed to be the most ancient work extant on the subject. *Vide* No. 1648.

Beginning. श्रीगणेशाय नमः ॥ अथ शालहोत्रभाषा ॥ दोहा ॥

नमो निरञ्जनदेव गुरुमार्त्तण्डब्रह्माण्ड ।

रोगहरण आनन्दकर सुखदायक जगदन्द्य ॥ १ ॥

End. श्रीराम मासकार्तिककृष्णपक्षद्वितीया तिथि शुभा नाम ।

चेतनचन्दमो भाषित गुरुको किया प्रणाम ॥

Colophon. इति श्रीपण्डितचेतनकृतशालहोत्र समाप्त ॥

विषयः । अश्वचिकित्साकथनं ।

No. 1647. अश्ववैद्यकं ।

Substance, English paper, 8½ × 7 inches. Folia, 261. Lines, 9 on a page. Extent, 1,615 s'lokas. Character, Nágara. Date, Sm. 1933. Place of deposit, Calcutta, Government of India. Appearance, new. Verse. Incorrect.

As'va-vaidyaka. A treatise on the Veterinary Art. By Jayadatta, son of Vijayadatta. Though professing to be an epitome, this is an elaborate work, treating, in considerable detail, of all the topics connected with the subject. It is divided into 68 sections. Contents: I. Introduction. II. Names and descriptions of the different parts of a horse's body. III. Characteristics of those parts. IV to VI. Effects of particular whirls of hair and marks on the body of a horse. VII. Motion of horses. VIII. Power and endurance of horses. IX. The voice of horses. X. Marks indicating defects. XI. Causes, other than disease, leading to weeping, refusal of food, &c. XII. Effects of particular shadows. XIII. Ditto of smell of the body. XIV. Size. XV. Span of life. XVI. Marks on the teeth indicating age. XVII. Ten stages in the life of a horse and its characteristics. XVIII. Mode of ascertaining the race of horses. XIX. Rules regarding riding. XX. Barren mares how to be made fruitful. XXI. Characteristics of a pregnant

mare. XXII. Rules to be observed during confinement. XXIII. Nursing of foals. XXIV. Rules regarding food for horses. XXV. Veterinary Materia Medica. XXVI. Modes of stabling, and feeding during different seasons. XXVII. Cautery with alkaline leys. XXVIII. Bleeding with a lancet. XXIX. Use of aromatics for promoting health. XXX. Fomentation. XXXI. Oleaginous drinks. XXXII. Medicated oils. XXXIII. Five bitters; medicines for fatigue. XXXIV. Decay not caused by disease. XXXV. Sickness from change of season. XXXVI. Worms. XXXVII. Diseases due to wind. XXXVIII. Names of certain diseases. XXXIX. Treatment of diseases of the mouth and the eyes. XL. Ditto of the head. XLI. Ditto of the ears. XLII. Ditto of coughs. XLIII. Ditto of hiccup. XLIV. Ditto of boils. XLV. Ditto of running from the nose. XLVI. Ditto of a disease called Ghrini: it is characterised by sores within the nostrils and running, and is apparently the same with glanders. XLVII. Ditto of diseases of the foot. XLVIII. Ditto of fevers. XLIX. Ditto of dyspepsia. L. Ditto of diarrhœa. LI. Ditto of dysentery. LII. Ditto of megrims. LIII. Ditto of worms and slime in the bowels. LIV. Ditto of frequent staling. LV. Ditto of leprosy. LVI. Ditto of Anasarca. LVII. Ditto of the diseases of the scrotum. LVIII. Ditto of the diseases of the belly. LIX. Ditto of piles. LX. Ditto of Utkarna, a disease in which the ears, tail and the skin of the body lose their power of action and swellings follow—apparently farcy. LXI. Ditto of diseases originating in excess of wind. LXII. Ditto of madness. LXIII. Ditto of fainting. LXIV. Curable and incurable diseases. LXV. Equine Toxicology. LXVI. Diagnostics from the breath. LXVII. and LXVIII. Equine vices.

Beginning. श्रीगणेशाय नमः। श्रीशालिहोत्राय नमः।

प्रणम्य शङ्करं भक्त्या शङ्करं सर्व्वदेहिनां।
शिवाय जगतो जातं शिवाच्चापि विशेषतः॥ १॥
शिष्यावबोधं शब्दार्थं ग्रन्थं विस्तारवर्ज्जितं।
लक्षणं वाजिदेहस्य सङ्क्षेपेण यथाक्रमं॥ २॥
चिकित्सा च समासेन सिद्धौषधसमन्विता।
मुनिप्रोक्तानि शास्त्राणि सम्यगालोक्य वाजिनां॥ ३॥
श्रीमद्विजयदत्तस्य पुत्रेण क्रियतेऽधुना।
श्रीमता जयदत्तेन वाहानां हितमिच्छता॥ ४॥

अध्यायानां यथायोगं षष्ट्यष्टादिकसङ्ख्या ।
श्लोकानां हि सहस्रेण शताष्टसंयुतेन च ॥ ५ ॥
प्रदेशलक्षणञ्चैव जीवितञ्च वयस्तथा ।
दशाविभागं क्षेत्रञ्च देशज्ञानञ्च वाहनं ॥ ६ ॥
वन्याक्रमं प्रसूतायाः शिशोश्च प्रतिपालनं ।
द्रव्यमात्राधिकञ्चैव निघण्टशोषणक्रमं ॥ ७ ॥
विधिः क्षीराग्निशस्त्राणां शिरावेधविधिस्तथा ।
निरूहे च विधिश्चैव वस्तिश्चैवानुवासने ॥ ८ ॥
नग्नस्वेदविधिश्चैव स्नेहपानान्यविक्रमं ।
तैलपाकविधानञ्च घृतपाकविधि तथा ॥ ९ ॥
शान्तोपचारं वाहानां तथारिष्टत्रयं पुनः ।
सगरोगचिकित्साञ्च चिह्नपूर्व्वं समासतः ॥ १० ॥
वातादीनाञ्च दोषाणां कोपहेतुस्तथैव च ।
निदानञ्चैव चिह्नञ्च रोगाणाञ्च चिकित्सितं ॥ ११ ॥
साध्यासाध्यविवेकञ्च कृच्छ्रसाध्येतिनिश्चयं ।
प्रकृतिञ्च तुरङ्गानां कथयाम्यनुपूर्व्वतः ॥ १२ ॥
रसोनादि तथा कल्कं मुनिभिः पूर्व्वचोदितं ।

End. रक्तपित्तज्वरं हन्ति कासं श्वासं तथा घृणिं ।
विद्रधिं क्षयरोगञ्च नाशयेद् वाजिनां ध्रुवं ॥ २५ ॥

Colophon. इति श्रीसामञ्जयदत्तकृतायुर्वैद्यकशास्त्रं समाप्तं ।

विषयः । अत्राष्टषष्ट्यध्यायाः सन्ति । तत्र १-मे,—ग्रन्थाभिधेयविवरणं । २,—वाजिदेहस्य-प्रदेशाः । ३,—अश्वाङ्गलक्षणं । ४,—स्थानविशेषे आवर्त्तचिह्नेन वाजिनां शुभा-शुभप्रदत्वकीर्त्तनं । ५,—वाजिनां पुण्ड्रचिह्ननिरूपणं । (पुण्ड्रपदेन लोमराजि-विरचित-शङ्ख-गदा-धनुर्वानादिचिह्नमुच्यते') । ६,—वाजिनां पुष्पचिह्ननिरूपणं । ७,—वाजिनां गतिनिरूपणं । ८,—वाजिनां वल्गनिरूपणं । ९,—वाजिनां स्वरनिरूपणं । १०,—वाजिनां दोषज्ञापकचिह्ननिरूपणं । ११,—वाजिनामुत्पात-प्रकरणं । (उत्पातस्तु व्याधिरहितस्य वाजिनः ग्रासत्यागाश्रुपातादयश्च) । १२,—वाजिच्छायानां शुभाशुभप्रदत्वकीर्त्तनं । १३,—सुगन्धदुर्गन्धभेदेन वाजिनां शुभा-शुभप्रदत्वकीर्त्तनं । १४,—वाजिप्रमाणनिरूपणं । १५,—अश्वायुर्लक्षणं । १६,—वाजिनां दन्तोद्भेदादिना वयोनिरूपणं । १७,—वाजिनां दशविधदशापरिमाण-निरूपणं, दशविधक्षेत्रनिरूपणञ्च । प्रत्येकदशापरिमाणन्तु द्विसप्ततिदिनाधिकवर्षत्रयं ।

विषयः। दशविधक्षेत्रन्तु गुह्यादिललाटपर्य्यन्तं प्रथमं क्षेत्रं। ललाटादिमस्तकं २-यं क्षेत्रं। ग्रीवास्कन्धादिकं ३-यं क्षेत्रं। उरोजानुककुदादिकं ४-र्थं क्षेत्रं। अंसकं ५-मं क्षेत्रं। दन्तिका ६-ठं क्षेत्रं। स्फिक् ७-मं क्षेत्रं। सूरकौ (?) ८-मं क्षेत्रं। जङ्घा ९-मं क्षेत्रं। कूर्चसन्धिः खुरश्च १०-मं क्षेत्रं। १८,—वाजिनां जन्मदेशनिरूपणं। १९,—अश्वानां वाहनविधिः। २०,—बन्ध्याया वड़वाया गर्भधारणविधिः। २१,—सगर्भाया वड़वाया लक्षणं। २२,—सूतिकानियमः। २३—अश्वशिशुपालननियमः। २४,—चनकव्रीहिमुद्गयवादीनां वाजिभोजनद्रव्यानां परिमाणकथनं। २५,—वाजिरोगनाशकभेषजनामानि। २६,—वाजिनां सर्व्वर्तुपोषणविधिः। (कस्मिन् ऋतौ कीदृशनियमेन अश्वः पालितव्य इत्यस्य नियमः)। २७,—वाजिनां रोगनाशकक्षारदाहविधिः। २८,—वाजिनां शिरावेधविधिः। २९,—अश्वानुवासनविधिः। (अपराह्णसमये सुगन्धद्रव्येण सुवासितकरणं अनुवासनं)। ३०,—वाजिनां स्वेदविधिः। ३१,—स्नेहपानविधिः। ३२,—वाजिरोगनाशकतैलविधिः। ३३,—पञ्चतिक्तघृतविधानं, वाजिनां श्रमशान्तिकरणोपायश्च। ३४,—स्वस्थारिष्टलक्षणं। (स्वस्थारिष्टस्तु रोगं विना यो वाजी दुर्मना हीनवर्णश्च स गतायुरित्यादिरूपः)। ३५,—वेधारिष्टलक्षणं। (ऋतौ शरदि, ग्रीष्मे च पानतः अश्वानां वेधाद्य उपसर्गा जायते, येनोपसर्गेन अश्वा अधोमुखाः सज्वराः श्वासकारिणश्च तिष्ठन्ति)। ३६,—अश्वानां कीटवेधारिष्टलक्षणं। (वर्षादिऋतौ तोयादिसेवनात् वाजिनां य उपसर्गा जायते स कीटवेधाद्य उपसर्गः। ३७,—वातादीनां प्रकोपसमयनिरूपणं। ३८,—वाजिरोगाणामवान्तरनामनिर्देशः। ३९,—वाजिनां मुखरोगनिदानचिकित्से, नेत्ररोगचिकित्सा च। ४०,—शिरोरोगनिदानचिकित्से। ४१,—कर्णरोगचिकित्सा। ४२,—कासरोगचिकित्सा। ४३,—हिक्काचिकित्सा। ४४,—व्रणचिकित्सा। ४५,—भिङ्गानकरोगचिकित्सा। ४६,—घृणिरोगचिकित्सा। ४७,—पादरोगचिकित्सा। ४८,—ज्वरचिकित्सा। ४९,—अजीर्णचिकित्सा। ५०,—अतिसारचिकित्सा। ५१,—उदावर्त्तचिकित्सा। ५२,—प्रस्कन्नचिकित्सा। ५३,—क्रमिकोष्ठश्लेष्मकोष्ठचिकित्सा। ५४,—मूत्रचिकित्सा। ५५,—कुष्ठचिकित्सा। ५६,—शोथचिकित्सा। ५७,—मुष्करोगचिकित्सा। ५८,—उदररोगचिकित्सा। ५९,—अर्शश्चिकित्सा। ६०,—उत्कर्णचिकित्सा। ६१,—वातव्याधिचिकित्सा। ६२,—उन्मादचिकित्सा। ६३,—अपस्मारचिकित्सा। ६४,—वाजिरोगानां साध्यासाध्यत्वनिरूपणं। ६५,—विषचिकित्सा। ६६,—वाजिनां वातादिप्रकृतिज्ञानं। ६७, ६८,—कल्कविधिनिरूपणं॥

No. 1648. अश्वचिकित्सितं ।

Substance, English paper, 9 × 7 inches. Folia, 82. Lines, 9 on a page. Extent, 438 s'lokas. Character, Nágara. Date, Sm. 1933. Place of deposit, Calcutta, Government of India. Appearance, new. Verse. Incorrect.

As'va-chikitsita. The Sanskrit original of the work, noticed under No. 1646. It comprises 18 Chapters. Contents : I. Introduction. II. Classification according to quality. III. Colors of horses—the white the best. IV. Whirls on eighteen places and their effects. V. Ascertainment of age from marks on the teeth. VI. Auspicious and inauspicious marks. VII. Of all qualities speed the most important. VIII and IX. On riders. X. Constitution of horses. XI. Seasonal influences. XII. Snuffs. XIII. Biliary complaints. XIV. Medicated butters. XV. Medicated decoctions. XVI. Poisonous drugs. XVII. Rules regarding stabling. XVIII. Not found in the MS. but it refers, according to the Introduction, to exercise. This work has been quoted largely in the Agni Purána, chapter 288.

Beginning. श्रीगणेशाय नमः ।

जयति स पाण्डवनाथो धर्म्मनिधानो युधिष्ठिरो नृपतिः ।
भीमार्ज्जुनसहदेवास्तदनुचरा ये वाजिशास्त्रतत्त्वज्ञाः ॥ १ ॥
दृष्ट्वा सम्यक् नकुलो ज्ञानं सर्व्वशालिहोत्रीयं ।
ब्रूते शास्त्रार्थमन्यच्छास्त्रं कृत्वा समासेन ॥ २ ॥
प्रश्नो जातिर्वर्णमावर्त्तदन्ता लक्षं वेगो वाहनं धातुरस्त्रं ।
कालो नस्यं पिण्डमाज्यं कषायं शाल्यां चेष्टां वाजिनामत्र वक्ष्ये ॥ ३ ॥

End. अश्वस्याङ्गे प्रलिपेद्धरिद्रया वरिष्ठया मङ्गल्या च ।
सुपविचान् दोषघ्नैर्विभूषयेदलङ्कारैः ॥ १० ॥

Colophon. इति श्रीनकुलकृतेऽश्वचिकित्सिते अश्वशालाविधिः अष्टादशोऽध्यायः ।

विषयः । अत्र १-मे,—शालिहोत्रमुनेः समीपे शक्रस्य रथयोग्यवाजिविषयकप्रश्नः । २-ये,—उत्तममध्यमनीचकनीयसां भेदेन चतुर्द्धा वाजिनिरूपणं । ३-ये,—सप्तवर्णानां वाजिनां मध्ये श्वेतवर्णस्य वाजिनः श्रेष्ठत्वकथनं । ४-र्थे,—ललाटादिविंशतिस्थानेषु आवर्त्तचिह्नेन वाजिन उत्तमतानिर्देशः । ५-मे,—दन्तविशेषेण वाजिनामायुःसङ्ख्याविज्ञानं । ६-ष्ठे,—चिह्नभेदेन वाजिनां सुलक्षणत्वकथनं । ७-मे,—सर्व्वेषां वाजिगुणानां मध्ये वेगगुणस्य अधिकत्वकथनं । ८-मे, ९-मे,—

अश्वारोहिलक्षणं । १०-मे,—वाजिनां धातुपरीक्षा । ११-शे,—ऋतुविशेषे वाजिसेवाविशेषनिरूपणं । १२-शे,—वाजिनां रोगविशेषे नग्नयोगनिरूपणं । १३-शे,—वाजिनां पित्तादिदोषे तत् शमनार्थं पिण्डयोगनिरूपणं । १४-शे,—वाजिनां रोगनाशकाज्यनिरूपणं । १५-शे,—वाजिनां रोगनाशकक्वाथनिरूपणं । १६-शे,—वाजिनां रोगनाशकविषप्रयोगः । १७-शे,—अश्वशालाविधिः । (एतद्ग्रन्थशेषे अष्टादशोऽध्याय इति यदुक्तं तद्भ्रममूलकं गणनायामष्टादशाध्यायस्याप्राप्तत्वात्) ।

No. 1649. सङ्कल्पकौमुदी ।

Substance, country-made paper, 15 × 4 inches. Folia, 56. Lines, 6 on a page. Extent, 1,722 s'lokas. Character, Bengali. Date, ? Place of deposit, Guptipárá, Rámadhana Vidyálaṅkára. Appearance, old. Prose and verse. Correct.

Saṅkalpa-kaumudí. Rules regarding religious resolution to perform a ceremony, and directions for particular duties on certain occasions. By Rámakṛishṇa.

Beginning. प्रणम्य कमलाकान्तं देववन्द्यपदाम्बुजं ।
तन्यते रामकृष्णेन रम्या सङ्कल्पकौमुदी ॥
यद्यपि सङ्कल्पपदं नानार्थं, तथापि 'सङ्कल्पः कर्म्ममानसम्' इत्यमरकोषात् मानसं कर्म्म मनःसङ्कल्पितं कर्म्म । मनःसङ्कल्पितत्वं आहार्य्यारोपविषयत्वं । यथा रुद्रयामले.——
न्यायेनोपार्ज्जितं द्रव्यं मनसोपार्ज्जितन्तु वा ।
निवेदयेदिष्टदेवे भक्तिश्रद्धासमन्वितः ॥ इत्यादि ।

End. अत एव मठस्थाचादि+नम इति क्षत्रपाठाय कल्पितं गृहं मठो न तु क्षत्राणां स्वत्वं, तत्र आदिपदग्राह्यः अतिथ्यादिः । किञ्च मीमांसकैः विग्रहस्वीकारेऽपि विग्रहस्य देवतात्वं न स्वीक्रियते । इति शिवं ॥

Colophon. समाप्तेयं सङ्कल्पकौमुदी ।

विषयः । सङ्कल्पलक्षणं । सङ्कल्पविचारः । सङ्कल्पानुष्ठाने अशौचादिव्यवस्था । व्रतप्रतिष्ठादौ तद्व्यवस्था । सङ्कल्पितकाम्यादिश्राद्धव्यवस्था । महाभारतादिसङ्कल्पविशेषकथनं । विवाहे वरपित्रा कन्यापित्रा वा नान्दीश्राद्धे कृते नाशौचप्रतिबन्धकत्वं । आरब्धाकरणे निन्दाकीर्त्तनं । विवाहानन्तरम् अशौचेऽपि चतुर्थीहोमादिकं कार्य्यमिति

विषयः। कथनं। आरम्भशब्दार्थनिरूपणं। दम्भलक्षणनिरूपणं। सङ्कल्पेन विनेतिवचनस्य विशेषव्याख्यानं। अपवित्रः पवित्रो वेत्यस्य विशेषव्याख्यानं। सूर्य्यः सोमो यम इत्यादिमन्त्रस्य विष्णुस्मरणानन्तरमेव पाठ्यतेति कथनं। 'ॐ तत्सदिति निर्द्देशो ब्रह्मणस्त्रिविधः स्मृत' इत्यस्य विशेषव्याख्यानं। जलाशयेतिशब्दार्थनिरूपणं। सङ्कल्पे दिङ्नियमः। 'मासपक्षतिथीनाञ्च' इत्यस्य विशेषव्याख्यानं। 'अद्य कृष्णाष्टमीं देवीम्' इत्यत्र अद्यपदपाठविचारः। उपनामलक्षणं। सङ्कल्पवाक्ये उपवासपदनिवेशविचारः। जन्मतिथिकृत्यनिरूपणं। गोत्राक्षेखविचारः। आश्विने मासि शुक्ले पक्षे अष्टम्यां तिथौ महाष्टम्यामित्युल्लेखः। न तु महाष्टम्यां तिथाविति कथनं। स्नानलक्षणादिकं। गङ्गायां पतितं दृष्ट्यादिजलं गङ्गैवेति कथनं। चण्डीपाठसङ्कल्पविचारः। शष्कुलीशब्दार्थनिरूपणं। उपवासपारणादिनिरूपणं। एकादश्यादौ पितृश्राद्धोपस्थितौ तत्कर्त्तव्यता। अतिदेशलक्षणादिकथनं। उपवासदिने काम्यश्राद्धनिषेधः। श्रवणद्वादशीनिरूपणं। अस्याः पारणव्यवस्था। मठायुत्सर्गनिरूपणञ्च। इति।

No. 1650. श्राद्धचिन्तामणिः।

Substance, palm leaves, $14\frac{1}{2} \times 2\frac{1}{4}$ inches. Folia, 133. Lines, 6 on a page. Extent, 3,491 s'lokas. Character, Bengali. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose and verse. Correct.

S'ráddha-chintámaṇi. Rules regarding offerings to the manes on particular occasions. By Váchaspati Mis'ra.

Beginning. प्रणम्य परमं तेजो विचार्य्याचार्य्यसंहिताः।
श्रीवाचस्पतिधीरेण श्राद्धस्य विधिरुच्यते॥

End. न ब्रह्मचारिणः कुर्य्युरुदकं पतिता न च।
पाषण्डमाश्रिताः स्तेना न व्रात्या न विकर्म्मिणः॥
गर्भभर्त्तृद्रुहश्चैव स्ववाप्यश्चैव योषितः।
स्तेना हिरण्यमात्रापहर्त्तारः। स्ववाप्य इति त्रैवर्णिकमात्रस्त्रीपरमिति सर्व्वञ्चतुरस्रं॥

Colophon. इति महामहोपाध्यायमिश्रश्रीवाचस्पतिविरचितः श्राद्धचिन्तामणिः सम्पूर्णः॥

विषयः। श्राद्धलक्षणं। तत्र प्राचीनमतं, नव्यमतञ्च। अत्र लक्ष्मीधर-वर्द्धमानादीनां मतकीर्त्तनं। श्राद्धभेदनिरूपणं। एकोद्दिष्ट-पार्व्वण-वृद्धिश्राद्धादीनां लक्षणादिकथनं। श्राद्धदेशनिरूपणं। पितृतीर्थादिकथनं। निषिद्धदेशकथनं। भूमि-

विषयः । संस्कारादिकीर्त्तनं । अग्रभागमदत्वा परकीयगृहे श्राद्धनिषेधः । अस्वामिकस्याननिरूपणं । श्राद्धकालनिरूपणं । अष्टकाश्राद्धद्रव्यकथनं । सर्व्वत्रानादेशे पशुशब्देन छागस्यैव ग्रहणमिति कथनं । नवोदकश्राद्धादीनां नित्यत्वकथनं । अश्वयुक्कृष्णश्राद्धविचारः । अत्र श्राद्धविवेकादिमतकीर्त्तनं । मघात्रयोदशीश्राद्धनिरूपणं । शस्त्रादिहतानां चतुर्द्दशीकर्त्तव्यश्राद्धकथनं । काम्यश्राद्धनिरूपणं । क्षीणाद्यमावस्यानिरूपणं । पिण्डपितृयज्ञादिश्राद्धव्यवस्था । श्राद्धवेलानिरूपणं । मासलक्षणादिकथनं । अत्र हलायुधपारिजातादीनां मतकथनं । श्राद्धदेशस्थापनीयद्रव्यकथनं । दौहित्रघृतलक्षणं । श्राद्धदेशादपसारणीयद्रव्यादिकथनं । श्राद्धविहितब्राह्मणाः । पङ्क्तिपावनलक्षणं । त्रिमध्वादिलक्षणं । श्राद्धसम्पल्लक्षणं । श्राद्धनिषिद्धब्राह्मणलक्षणादिकथनं । हविष्यनिरूपणं । तत्र वाङ्मीणमलक्षणं । अचारलवणनिरूपणं । श्राद्धे वर्ज्जनीयद्रव्यकथनं । मांसनिरूपणं । फलानि । कन्दकथनं । शाककथनं । लवणकथनं । सहजातो निषिद्धद्रव्यकथनं । तीर्थश्राद्धविहितद्रव्यनिरूपणं । दर्भादिलक्षणं । निमन्त्रणप्रकारादिकथनं । अर्घ्यपात्रादिनिरूपणं । गन्धादिनिरूपणं । परिवेषणविधिः । पात्रविशेषे फलविशेषकथनं । श्राद्धीयभोजनं । वेदिकरणविधिः । याचकेभ्यः अन्नदानं । श्राद्धोत्तरकर्म्मविधानं । परिभाषा । पार्व्वणश्राद्धप्रयोगोल्लेखप्रकारः । आमश्राद्धविधिः । तीर्थश्राद्धविधिः । जीवत्पितृकश्राद्धविधिः । एकोद्दिष्टश्राद्धविधानं । षोड़शश्राद्धानि । वृषोत्सर्गविधिः । उदकुम्भनिर्णयः । मासिकापकर्षकथनं । सपिण्डनापकर्षकथनं । सपिण्डने निषिद्धनक्षत्राणि । सपिण्डीकरणविधिः । आभ्युदयिकश्राद्धविधिः । तत्कालनिरूपणं । श्राद्धाधिकारिनिरूपणं । द्वादशविधपुत्रकथनं । पुत्रत्वातिदेशकथनं । पुत्रपदनिर्व्वचनं । स्त्रीश्राद्धाधिकारिनिरूपणं । अनधिकारिनिरूपणञ्च ।

No. 1651. काव्यप्रकाशरहस्यप्रकाशः ।

Substance, country-made paper, 17 × 3 inches. Folia, 185. Lines, 8—9 on a page. Extent, 7,076 s'lokas. Character, Bengali. Date, Sk. 1579. Place of deposit, Navadvípa, Harinátha Tarkasiddhánta. Appearance, old. Prose. Correct.

Kávya-prakás'a-rahasya-prakás'a. A commentary on the Kávya-prakás'a of Mammaṭṭa Bhaṭṭa. By Jadagís'a Tarkapañchánana.

Beginning. निद्राणेव मदेकमुद्रितमतौ पुष्पायुधे मायुधे
प्रीतेवार्पितलोचनाम्बुजबलौ चक्रायुधेऽनायुधे।
मैवामीत कुपितेव किञ्च जगतां विद्रावणे रावणे
शम्भोः कापि कृपा दृगन्तकलिना भिद्याद्विद्यामदं॥
सम्प्रति स्वमतिप्रीत्यै श्रीजगदीशद्विजो धीमान्।
काव्यप्रकाशसूक्तौ सरसरहस्यं प्रकाशयति॥
ग्रन्थारम्भे क्रियमाणस्य मङ्गलस्य निष्फलत्वशङ्कां निराकुर्वन् नियतिकृतनियम-
रहितामित्यादिश्लोकव्याख्यां ग्रन्थकृदारभते॥ ग्रन्थारम्भ——इत्यादि।

End. तत्र शिष्यजिज्ञासाक्रमेण तत्कथनात् शिष्यजिज्ञासानिवृत्तौ वक्तव्याभावेन
सम्पूर्णम् अनपेक्षितवाक्यान्तरं। श्रीः।
बाले! त्वं किमु कातरासि पिशुनव्यालावलीव्याहृतौ
हा मातः! सरलौषधव्यतिकरे कस्मादसौ व्याहृतिः।
तत् किं हन्त! तदौषधं प्रतिपदं मागास्तदीयास्पदं
तेषां तद्विषपूर्णकर्णकुहरे कोपीच्छया गच्छति॥

Colophon. इति श्रीजगदीशतर्कपञ्चाननभट्टाचार्य्यकृते काव्यप्रकाशरहस्यप्रकाशे अर्थालङ्कार-
निरूपको दशमोल्लासः समाप्तः।
कन्दर्पं दहते विधुञ्च वहते भागीरथीं बिभ्रते
मृत्युं वारयते विषं वशयते ब्रह्माणमुच्छासते।
बाणं वर्द्धयते वृषं कलयते दक्षाधिमातन्वते
पापं खण्डयते जगन्नटयते कस्मैचिदस्मै नमः॥
शाके रन्ध्राद्रिबाणक्षितिपरिगणिते माघमासे नवम्यां
पक्षे चैवावलक्षे ग्रहपतिदिवसे जीवयुग्युग्मलग्ने।
न्यायालङ्कारधीरो निजगुरुरचितं पुस्तमेतत् समस्तं
स्वीयं स्वीयाङ्गनस्थो व्यलिखदनलसोऽध्यापनार्थं सुखेन॥
शुभमस्तु शकाब्दाः १५७९।

विषयः। काव्यप्रकाशस्य व्याख्यानं।

No. 1652. उपमानखण्डः।

Substance, country-made paper, 14 × 4 inches. Folia, 22. Lines, 5 on a page. Extent, 261 s'lokas. Character, Bengali. Date, ? Place of deposit, Guptipáḍá, Khudiráma Nyáyabhúshaṇa. Appearance, fresh. Prose. Correct.

Upamána Khaṇḍa of the *Nyáya-chintámaṇi*. A complete codex of the work noticed under No. 601, Vol. II, p. 50.

Beginning. तत्र सादृश्यप्रमाकरणमुपमानमिति केचित्। सादृश्यञ्च पदार्थान्तरं। तथापि सदृशव्यवहाराद्बाधितादस्ति सादृश्यं।

End. गोसदृशो न गवय इत्यत्रापि परम्परया तात्पर्य्यमस्त्येवेति सर्व्वमवदातं।

Colophon. इति महामहोपाध्यायश्रीगङ्गेशचिन्तामणिविरचिते श्रीतत्त्वचिन्तामणौ उपमानखण्डः समाप्तः। शुभं।

विषयः। उपमानलक्षणं। उपमानात्मकसादृश्यज्ञानविषयस्य सादृश्यस्य नैयायिकमतसिद्धषटपदार्थातिरिक्तपदार्थत्वखण्डनं। उपमानस्य प्रमाणान्तरत्वव्यवस्थापनञ्च।

No. 1653. श्राद्धदर्पणं।

Substance, country-made paper, 15 × 4 inches. Folia, 35. Lines, 7 on a page. Extent, 898 s'lokas. Character, Bengali. Date, ? Place of deposit, Guptipáḍá, Khudiráma Nyáyabhúshaṇa. Appearance, fresh. Prose and verse. Correct.

S'ráddha-darpaṇa. On periodical and occasional offerings to the manes. By Jayakṛishṇa Tarkavágís'a.

Beginning. प्रणम्य सच्चिदानन्दं भुक्तिमुक्तिप्रदायकं।
क्रियते जयकृष्णेन निर्म्मलं श्राद्धदर्पणं॥
तत्र पार्व्वणप्रसङ्गात् श्राद्धलक्षणमुच्यते,—सम्बन्धपदोपनीतान् पितॄनुद्दिश्य हविस्त्यागः श्राद्धमिति।

End. तत्र च अष्टमी नार्द्धरात्रे न वा पूर्व्वाह्णे,—तत्र पूजा कुत्र कार्य्या, तथा च अर्द्धरात्रे एव न कालान्तरे। इति शं।

Colophon. इति श्रीजयकृष्णतर्कवागीशकृतश्राद्धदर्पणं समाप्तं।

विषयः। पार्व्वणस्वरूपकथनं। तत्र पूर्व्वदिने निरामिषसकृद्भोजनादिविचारः। ब्राह्मणोपवशनात् प्राक् यज्ञेश्वरस्य स्मरणमेव कर्त्तव्यं, न तु पूजनमिति मैथिलमतदूषणं। विष्णुमुद्दिश्य निवेदितान्नेन श्राद्धं कर्त्तव्यं न वेत्यत्र निवेदितशेषान्नेन तदनुष्ठानमिति सिद्धान्तः। अनुज्ञाग्रहणविचारः। पार्व्वणातिदेशकथनादिकं। अर्घ्यदानप्रकरणं। गन्धादिदानविधिः। दक्षिणावाक्यविचारः। श्राद्धे पाकविचारः। स्त्रीशूद्रकर्त्तृकश्राद्धविधिः। विघ्नपतितश्राद्धकालनिरूपणं। अशौचान्त-

कृत्यविचारः। अपकर्षसपिण्डननिरूपणं। एकोद्दिष्टविधिः। सपिण्डनक्रमनिरूपणं। मघात्रयोदशी। दीपान्विता। नवान्नश्राद्धविधिः। वारुणी। अम्बुवाची। जन्माष्टमीविचारः। इति।

No. 1654. मुद्राराक्षसपूर्व्वपीठिका।

Substance, country-made paper, 16 × 4 inches. Folia, 10. Lines, 5 on a page. Extent, 575 s'lokas. Character, Bengali. Date, ? Place of deposit, Sántipura, S'rínátha Bhaṭṭáchárya. Appearance, new. Prose. Generally correct.

Mudrá-rákshasa-púrvapíṭhiká. A prose version of the well-known drama of *Mudrá-rákshasa*, or 'the Signet and the Minister' of Vis'ákha Deva. By Ananta Kaví. The author lived on the banks of the Godávarí River. The drama itself has been printed several times, and translated into English in Wilson's Hindu Theatre.

Beginning. सर्व्वे साधुजनाः सदायतहृदा सत्सम्प्रदायादृतं
यज्ज्ञानाय कणादगौतममतान्यालोक्य, तत्त्वार्थदान।
वेदान्तान् परिशीलयन्ति रहसि स्वानन्दकन्दाकरं
वन्दे तं जगदीश्वरं दयितया सानन्दमालिङ्गितं॥
पञ्चाशद्वर्णभेदैरपरिमिततरैरर्थजातैश्च युक्ता
नानालङ्काररम्या गणितगुणगणा साधुवृत्तैरुपेता।
वाक्सृष्टिर्यत्प्रसादात् प्रसरति रसनोपान्तदेशे निमेषा-
न्नित्यं चित्तेऽनुरक्ते वसतु मम सुखं भारती सा रसाढ्या।
यद्रत्नस्फारहाराऽभयवरदकरा सस्रधम्मिल्लभारा
मूलाधाराधिकारा निगमनिधिधरा काव्यकोटिप्रचारा॥
संसारानल्पकारा शयनभयहरा चिद्वनैकावतारा
तारा शृङ्गारधारा मनसि निवसतां सर्व्वदा सर्व्वमारा॥
अभूद् भवस्यातिसुखाय या ध्रुवं विशाखदेवाभिधमद्रुधस्य।
कृतिस्तदीयामिह पूर्व्वसङ्कथां करोम्यनन्तो विदुषां सुखाय॥
अस्ति पुरन्दरसुन्दरदिग्भागे भगवद्भागीरथीपरिसरे समस्तवसुविश्रमविश्रान्ति-
भाजनजनजेगीयमाननिवासविराजमानं कुसुमपुरं नाम नगरं।——

End. मलयकेतुविरोधपुरःसरं मन्त्रिराक्षसेन सह चन्द्रगुप्ता मैत्रीं कर्त्तुमुद्यतः, तथा घटनार्थमुद्यममकरोत्।

Colophon. इति श्रीमद्गोदावरीपरिसरालङ्कृतपुण्यसम्वस्थितिमतिविलासशालिश्रीयुक्ता-नन्तकविविरचिता मुद्राराक्षसपूर्व्वपीठिका समाप्ता।

विषयः। कुसुमपुरवर्णनं। नन्दस्य उदग्रधन्व-तीक्ष्णधन्वेत्यादिनवपुत्रनामकीर्त्तनं। प्रति-पक्षभूपालानां नन्दसमीपे सुवर्णपट्टिकान्तःसंस्थापितारक्षिमानदेवदारुकाष्ठप्रेषण-विवरणं। चामरग्राहिण्या सुमङ्गलया सह नन्दस्य वसन्तोत्सवदर्शनाय प्रमदवन-प्रवेशः। तत्र च पिपीलिकापङ्क्तिसन्दर्शनेन राजमुखकमलं सस्मितमाकलय्य सुमङ्गलायां स्मितवदनायां वदन्त्याञ्च महाराजस्मितेनैव मम स्मितं सञ्जातमिति राज्ञो 'मत्स्मितहेतुं कथय नो चेत् त्वां निग्रहिष्ये' इति सुमङ्गलां प्रति निदेश-कथनं। ततस्तु कस्यचित् ब्राह्मणस्य उपदेशेन सुमङ्गलया राज्ञः स्मितकारणकथनं। सुबुद्धिशर्म्माभिधेयाय द्विजाय मन्त्रिराक्षसपदवीं प्रदाय नन्दस्य स्वामात्यकृत्ये नियोजनवृत्तान्तः। नन्दस्य मृत्युः। गुरुदक्षिणासङ्ग्रहाय सुविद्यस्य कुसुमपुर-प्रवेशः। तस्य पुनः विद्याबलेन नन्दमृतदेहप्रवेशः। राक्षसानुसन्धानेन सुविद्यस्य पूर्व्वदेहदाहनं। कुसुमपुरं परित्यज्य राक्षसस्य पर्व्वतेश्वरसन्निधिप्राप्तिकथनं। छद्मिनन्दस्य शकटाराभिधेन मन्त्रिणा सार्द्धं मृगयानुष्ठानार्थं वनप्रयाणं। तत्र च कस्याञ्चित् दीर्घिकायां शिलापट्टलिखितं,

"अत्युच्छ्रिते मन्त्रिणि पार्थिवे च विश्रम्य पादावुपतिष्ठते श्रीः।
सा स्त्रीस्वभावादसहा भरस्य, तयोर्द्वयोरेकतरं जहाति॥
तुल्यार्थं तुल्यसामर्थ्यं मर्म्मज्ञं व्यवसायिनं।
अर्द्धराज्यहरं विप्रं यो न हन्यात् स हन्यते"॥

इति श्लोकद्वयं निर्व्वर्ण्य कदाचित् स्वनिधनमाशङ्कमानेन शकटारेण पिपासितस्य राज्ञो निधनादिवृत्तान्तकथनं। उदग्रधन्वाभिधस्य नन्दकुमारस्य राज्याभिषेकादि-विवरणं। नन्दनिधनकारणं तत्त्वतो निर्णेतुं करुणाकरनामकस्य तपस्विनो वीर-साधनप्रकारकथनं। शकटारमेव सुधन्वापरनामधेयस्य नन्दस्य घातकं ज्ञात्वा तद्वधाय राज्ञ आदेशः। पलपञ्चकमितचणकजलमात्राहारं दत्वा सपुत्रकलत्रस्य शकटारस्य भूमिगृहवासरूपदण्डविधानं। तावन्मात्राहारेण कथमपि धृतजीवि-तस्य विकटारस्य शकटारपुत्रस्य राजकारुण्येन मोचनकथनं। कुसुमपुरप्रत्या-गमनपुरःसरं राक्षसस्य पुनरमात्यपदग्रहणविवरणं। राक्षसस्य विकटारं प्रति श्राद्धोपयोगिब्राह्मणनिमन्त्रणार्थमादेशः। कुशमूले माक्षिकप्रक्षेपणार्थं निक्षिप्त-नयनेन शिवगुप्ततनयेन विष्णुगुप्तेन सह विकटारस्य साक्षात्कारविवरणादिक।

श्राद्धकाले श्रासनापसारितस्य विष्णुगुप्तस्य शिखाबन्धनप्रतिज्ञा। राजसेन-भागुरायण-विजयवर्म्मादिभिः सार्द्धं चन्द्रगुप्तस्य विष्णुगुप्तानुगमनकथनं। पर्व्वतेश्वरेण सह तेषां मैत्र्यादिकथनं। कुसुमपुररोधादिकथनं। चन्द्रगुप्तस्य राज्यलाभः। पर्व्वतेश्वरेण सह राक्षसस्य सन्धिः, चन्द्रगुप्तनाशाय विषकन्याप्रेरणञ्च। पर्व्वतेश्वरहननं। मन्त्रिराक्षसेन सह चन्द्रगुप्तस्य मित्रताघटनञ्च।

No. 1655. बृहन्नीलतन्त्रं।

Substance, some leaves of country-made yellow paper, and some of country-made white paper, 13 × 4½ inches. Folia, 215. Lines, 5 on a page. Extent, 3,225 s'lokas. Character, Bengali. Date, ? Place of deposit, Guptipádá, Rámadhana Vidyálaṅkára. Appearance, fresh. Verse. Incorrect.

Vṛihannila Tantra. One of the 64 original Tantras, attributed to Mahádeva. Its subject is the ritual of the S'ákta divinities, giving special preeminence to the worship of a form of Máyá named Nílasarasvatí.

Beginning. कैलासशिखरासीनं भैरवं कालसञ्चितं।
प्रोवाच सादरं देवी तस्य वक्षःसमाश्रिता॥
पुरा प्रतिश्रुतं देव कालीतन्त्रप्रकाशने।
नीलतन्त्रप्रकाशाय तद्वदस्व सदाशिव॥
यस्य विज्ञानमात्रेण विजयी भुवि जायते।
यज्ज्ञात्वा साधकाः सर्व्वे विचरन्ति यथा तथा॥ इत्यादि।

End. सत्यान्निष्ठं महेशानि तत्र तिष्ठति निश्चितं।
सर्व्वविद्या भवत्येव संशयो नास्ति कश्चन॥
अहं शिवः परात्मा च विना तासु महेश्वरि।
शव एव महेशानि कथितं दुर्लभं शिवे॥

Colophon. इति श्रीबृहन्नीलतन्त्रे सर्व्वतन्त्रोत्तमे भैरवपार्व्वतीसंवादे त्रयोविंशतिपटलं समाप्तं। समाप्तोऽयं ग्रन्थः।

विषयः। १ पटले,—शिवाशिवसंवादेन तन्त्रकथनप्रतिज्ञानिरूपणं। नीलसरस्वत्या बीजादिनिरूपणं। स्नानतिलकादिप्रकारकथनं। द्वादश्यादिष्वपि तान्त्रिकसन्ध्याया अनुष्ठानकर्त्तव्यतादिकं।

२ पटले,—एकलिङ्गस्थानलक्षणं। साधनयोग्यस्थाननिरूपणं। नीलसरस्वतीपूजा-

विषयः। विधानं। पुष्पनिरूपणं। त्रिविधगुरुनिरूपणं। बलिदानं। मन्त्रध्यानप्रकारः। नीलसरस्वतीस्तोत्रं। ताराष्टकं। अष्टाङ्गप्रणामलक्षणं।

३, ४ पटले,—दीक्षाविधिः। दीक्षाया आवश्यकता। सद्गुरुलक्षणादिकथनं। पितुरपि गुरोर्गरीयस्त्वकथनं। दीक्षाकालः। तत्स्थानं। तत्र नक्षत्रादिनिरूपणं। गुरोः सन्निधाने अन्यदेवपूजानिषेधः। पुरश्चरणविधिः।

५ पटले,—नैमित्तिक-काम्यपूजाविधानं। ब्राह्मण-राजन्य-वैश्यानां सुरापाननिषेधः। सुराभेदकथनं। अमन्त्रितसुरापाने प्रायश्चित्तविधानं। ऊर्व्वशी-भार्गवोपाख्यानं। वैधसुरापानं न दोष इति कथनं। अनुकल्पामवनिरूपणं। पीठार्चनविधिः। पीठनिरूपणं। सिद्धस्थानकथनं। महोत्तमस्थाननिरूपणं।

६ पटले,—कौलिकार्चनमाहात्म्यं। शक्तिपूजाप्रकारकथनं। कालीप्रयोगकथनं। शिवाबलिदानविधिः। शाक्तानामाचारक्रमकीर्त्तनं। कौलानां प्रायश्चित्तादिपञ्चकविवर्ज्जनावश्यकता। वैधहिंसातिरिक्तहिंसायां दोषः। समयाचारलक्षणं। कालिकापूजनविधिः। रटन्तीपूजाविधिः। अन्नपूर्णापूजाविधिः। ऋतुभेदे दैनिकऋतुभेदकथनं। तत्र षट्कर्म्मविधानं। आसनविनियोगः। ज्योतीरूपदर्शनोपायकीर्त्तनं। कौलिकाचारकथनं। होमविधानं।

७, ८ पटले,—निग्रहोपायकीर्त्तनं। वशीकरणं। शान्तिस्तोत्रं। महाचीनक्रमकीर्त्तनं। सारस्वतप्रयोगकथनं। अत्र सुरेन्द्रसुराचार्य्ययोः संवादकीर्त्तनं। पुनरन्नपूर्णापूजाविधानं। कुमारीपूजाविधिः। यन्त्रकथनं। रक्तादिदानयोग्यपशुनिरूपणं। दारुवनवृत्तान्तकीर्त्तनं। कलियुगे तारिण्यादिमन्त्राणां प्राधान्यकथनं। कालीमन्त्रकथनादिकं। मन्त्रसंस्कारप्रकारः। तत्र दशविधसंस्कारकथनं। त्रिविधशाम्भवचक्रकथनं। ब्रह्मस्वरूपकथनादिकं।

९, १०, ११ पटले,—प्रकारान्तरेण वीरसाधनकथनं। नायिकासाधनं। श्रीवीजादिसमुद्धारप्रकारः। विद्यारत्नकथनं। नीलसरस्वत्या आविर्भावकथनादिकं। हयग्रीवसोमकयोरुपाख्यानं। मत्स्यरूपेण विष्णुना सह तयोर्युद्धादिकीर्त्तनं। सर्व्वज्ञताकारणकथनं।

१२, १३, १४, १५ पटले,—विद्योत्पत्तिकथनं। स्त्रीपुरकथनं। प्रलयकाले वटपत्रशयानायाः कालिकायाः ब्रह्मादिकृतस्तोत्रादिकथनं। कामाख्यामन्त्रकथनं। चतुःषष्टियोगिनीकथनं। ब्रह्मपुत्रनदोत्पत्त्यादिकथनं। वरुणकुण्डादिकथनं। वायुकूट-चन्द्रकूटपर्व्वतादिकथनं। सोमकुण्डकथनं। भस्मकूटगिरिकथनं। ऊर्व्वशीकुण्डकथनं। मणिकूटादिकथनं। वामवकुण्डोपाख्यानं। ब्रह्मकूट-नीलकूटादिकथनं। ऊर्व्वशी-सिद्धगणेशादीनां ध्यानं।

१६, १७, १८ पटले,—सदाचारलक्षणं। सङ्क्षेपेण राजकर्म्मकथनं। महाशम्यादौ दुर्गापूजाविधानं। नीराजनविधिः। ज्येष्ठपूर्णिमायां कालिकायाः स्नानयात्राविधानं। आश्विनकार्त्तिकमासादौ तस्याः स्नानादिविधानं। सारस्वतध्यानादिकथनं। होमार्थं कुण्डनिर्म्माणविधानं। होमविधिः। तारानाममहस्रस्तोत्रं। हरिनामग्रहण—तुलसीस्पर्शनादिनिषेधः।

१९, २०, २१, २२, २३ पटले,—तारकवचकथनं। गुप्तमन्त्रादिकीर्त्तनं। तारा-शतनामस्तोत्रं। ज्ञानोपायकीर्त्तनं। सीमकप्रयोगेन रोप्यकरणप्रकारः। पारद-भस्मीकरणप्रकारः। त्रिविधभावनिरूपणं। कालीनाममहस्रस्तोत्रं। कालीशत-नामस्तोत्रं। अन्नदामन्त्रकथनं। अन्नदाशतनामस्तोत्रं। दहनीलतन्त्रफलश्रुतिः।

No. 1657. भागवतसन्दर्भे क्रमसन्दर्भः।

Substance, country-made paper, 13 × 4 inches. Folia, 52. Lines, 12—15 on a page. Extent, 2,437 s'lokas. Character, Bengali. Date, ? Place of deposit, Sántipura, Pandit Kálidása Vidyávagís'a. Appearance, old. Prose. Correct.

Krama Sandarbha. The philosophy of the Bhágavata Puráṇa illustrated, supplying omissions and deficiencies in the commentary of the Bhágavata by S'ridhara Svámi. By Jíva Gósvámí. The work is in seven parts, and is known under the collective name of Bhágavata Sandarbha ; the codex under notice comprises a portion of the last part, entitled *Krama Sandarbha.*

Beginning. अज्ञानतिमिरान्धस्य ज्ञानाञ्जनशलाकया।
चक्षुरुन्मीलितं येन तस्मै श्रीगुरवे नमः॥
श्रीमद्भागवतं नौमि यस्यैकस्य प्रसादतः।
अज्ञातानपि जानाति सर्व्वः सर्व्वागमानपि॥
श्रीभागवतसन्दर्भान् श्रीमद्वैष्णवतोषणीं।
दृष्ट्वा भागवतव्याख्या लिख्यतेऽत्र यथामति॥)
जयेतां मथुराभूमौ श्रीलरूपसनातनौ।
यौ विलेखयतस्तत्त्वज्ञापकौ पुस्तिकामिमां॥

यस्य ब्रह्मेति सञ्ज्ञां क्वचिदपि निगमे याति चिन्मात्रसत्ता-
यंशो यस्यांशकैः स्वैर्विभवति वशयन्नेव मायां पुमांश्च ।
एकं यस्यैव रूपं विलसति परमव्योम्नि नारायणाख्यं
स श्रीकृष्णस्वरूपः स्फुरदुरुभगवान् प्रेम दद्यात् भजद्भ्यः ॥
अथैवं सूचितानां श्रीकृष्णवाच्यवाचकतालक्षणसम्बन्धतद्भजनलक्षणाभिधेय-
ततप्रेमलक्षणप्रयोजनानां निर्णयाय पूर्वं तत्त्वसन्दर्भादिषट्सन्दर्भा निरूपिताः।
अधुना तु श्रीमद्भागवतक्रमव्याख्यानाय तत्रापि सम्बन्धाभिधेयप्रयोजननिर्णय-
प्रदर्शनाय च सप्तमः क्रमसन्दर्भोऽयमारभ्यते ।
श्रीभागवतमिद्धार्थां टीका दृष्टिवदा + + ।
श्रीधरस्वामिपादांस्तान् वन्दे भक्त्यैकरक्षकान् ॥
स्वामिपादैर्न यद्व्यक्तं यद्व्यक्तं चास्फुटं क्वचित् ।
तत्र तत्र च विज्ञेयः सन्दर्भः क्रमनामकः ॥
अथात्र परिभाष्यं ज्ञातव्या यद्यपेक्ष्यते ।
मूलं सटीकमङ्काद्यैः परिच्छेद्यं सहानया ॥
अङ्का वाक्यान्त-एवात्र देयाः पद्यान्ततो न तु ।
बहुपद्यैकवाक्यत्वे गर्भाङ्का विन्दुमस्तकाः ॥
यस्मिन् पद्ये नास्ति टीका तदप्यङ्केन योजयेत् ।
एकपद्यान्यवाक्यत्वे सङ्ख्याशब्दासु कान्तकाः ॥
बहुपद्यैकवाक्यत्वेऽप्यमी ज्ञेयास्तथाविधाः ।
यथाद्वेकं युग्मकश्च त्रिकमित्याद्युदाहृतिः ॥
जन्माद्यस्येत्यत्र श्रीस्वामिचरणानामयमभिप्रायः । परं परमेश्वरमिति न पुन-
रभेदवादिनामिव चिन्मात्रं ब्रह्मेत्यर्थः । इत्यादि ।

End. ततो निमित्ताभावे नैमित्तिकस्याप्यभावात् । टेलोपाच्च सिध्यन्ति ॥ ३३ ॥ ३७ ॥

Colophon. इति प्रथमक्रमसन्दर्भे एकोनविंशोऽध्यायः ॥

इति कलियुगपावनस्वभजनविभजनप्रयोजनावतारश्रीश्रीभगवत्कृष्णचैतन्यदेव-
चरणानुचरविश्ववैष्णवराजसभासभाजनश्रीरूपसनातननानुशासनभारतीगर्भ सप्त-
सन्दर्भात्मकश्रीभागवतसन्दर्भे प्रथमस्कन्धस्य क्रमसन्दर्भः समाप्तः ॥

विषयः । श्रीधरस्वामिकृताया भागवतटीकायाः परिशिष्टरूपेयं विवृतिः । किञ्च यत्र यत्र
स्वामिना व्याख्या न कृता कृताप्यस्फुटा वा तत्र तत्र विशदीकरणं ।

No. 1657. भागवतसन्दर्भे परमात्मसन्दर्भः ।

Substance, country-made paper, 13 × 4 inches. Folia, 67. Lines, 8—9—10 on a page. Extent, 2,010 s'lokas. Character, Bengali. Date, Sk. 1593. Place of deposit, S'ántipura, Pandit Kálidása Vidyávágís'a. A second copy at Calcutta, in the Family Library of Dr. Rájendralála Mitra. Appearance, old. Prose and verse. Correct.

Paramátma-sandarbha. The third part of the work noticed under the last preceding No. 1656. It treats of the Divine spirit.

Beginning. तौ सन्तोषयता सन्तौ श्रीलरूपसनातनौ ।

दाक्षिणात्येन भट्टेन पुनरेतद्विविच्यते ॥

तस्याद्यं ग्रन्थनालेखं क्रान्तव्युत्क्रान्तखण्डितं ।

पर्य्यालोच्याथ पर्य्यायं कृत्वा लिखति जीवकः ॥

अथ परमात्मा विव्रियते । यद्यपि परमात्मत्वं वैकुण्ठेऽपि प्रभोरस्ति । इत्यादि ।

End. यथेन्द्रियैः पृथग् द्वारैरर्थो बहुगुणाश्रयः ।

एको + + यते तद्वद्भगवान् शास्त्रवर्त्मभिः ॥

इत्येव उदाहरणीयं । अनेनैव गतिसामान्यञ्च सिध्यतीति । २ । २ । श्रीशुकः ।

प्रत्यवस्थापितं वदन्तीत्यादि पद्यं ।

Colophon. इति कलियुगपावनस्वभजनविभजनप्रयोजनावतारश्रीभगवत्कृष्णचैतन्यदेवचरणानुचरविश्ववैष्णवराजसभासभाजनश्रीरूपसनातनानुशासनभारतीगर्भे श्रीभागवतसन्दर्भे परमात्मसन्दर्भो नाम तृतीयः सन्दर्भः । शुभमस्तु शकाब्दाः १५९३ ।

विषयः । परमात्मनिरूपणादिकं । गुणावताराणां तारतम्यविवेचनं । जीवमायादीनां स्वरूपादिनिरूपणं । तिवर्त्तसमाधानं । परमात्मप्रपञ्चयोरभेदकीर्त्तनं । परमात्मनो जगद्भिन्नत्वकथनञ्च । जगतोऽसत्यत्वकथनं । श्रीधरकृतटीकाया अभिप्रायप्रकाशनं । निर्गुणे परात्मनि कर्त्तृत्वादीनां समन्वयः । लीलावतारप्रयोजनकीर्त्तनं । वेदान्तसूत्रादीनामभिप्रायकथनं । भागवतप्रशंसा । भगवत्येव सर्व्वेषां शास्त्राणां तात्पर्य्यप्रदर्शनं । ग्रन्थस्यायं श्रीमद्भागवतीयानां कपाञ्चित् श्लोकानां गूढार्थप्रकाशनमुखेन निर्म्मिततया तट्टीकास्थानीयः ।

No. 1658. श्रीकृष्णसन्दर्भः ।

Substance, country-made paper, 13 × 4 inches. Folia, 77. Lines, 13 on a page. Extent, 3,816 s'lokas. Character, Bengali. Date, ? Place of

deposit. S'ántipura, Kálidása Vidyávágís'a. A second copy at Calcutta, in the Family Library of Dr. Rájendralála Mitra. Appearance, fresh. Prose and verse. Correct.

S'rikrishṇa-sandarbha. The fourth part of the work noticed under No. 1656. It treats of Krishṇa as the divine spirit.

Beginning. तौ मन्तोषयता मन्तौ श्रीलरूपसनातनौ ।
दाक्षिणात्येन भट्टेन पुनरेतद्विविच्यते ॥
तस्माद्यं ग्रन्थनालेखं क्रान्तगुल्क्रान्तखण्डितं ।
पर्य्यालोच्याथ पर्य्यायं कृत्वा लिखति जीवकः ॥
अथ पूर्व्वं सन्दर्भत्रयेण यस्य सर्व्वपरत्वं साधितं तस्य श्रीभगवतो निर्द्धारणाय सन्दर्भोऽयमारभ्यते । इत्यादि ।

End. अपि परिपाटीरिति । पूर्णं सम्बन्धः ।
गौरश्यामरुचोज्ज्वलाभिरमनैरक्ष्णोर्विलासोत्सवै-
र्नृत्यन्तीभिरशेषमादनकलावैदग्धीदिग्धात्मभिः ।
अन्योन्यप्रियतासुधापरिमलस्तोमोन्मदाभिः सदा
राधामाधवमाधुरीभिरभितश्चित्तं समाक्रम्यतां ॥

Colophon. इति कलियुगपावनस्वभजनविभजनप्रयोजनावतारश्रीश्रीभगवत्कृष्णचैतन्यदेवचरणानुचरविश्ववैष्णवराजसभासभाजनश्रीरूपसनातनानुशासनभारतीगर्भे श्रीकृष्णसन्दर्भो नाम चतुर्थः सन्दर्भः ।

विषयः । ग्रन्थः खल्वयं श्रीमद्भागवतीयानां केषाञ्चित् श्लोकानां गूढार्थप्रकाशनमुखेन निर्म्मितत्वया तट्टीकास्थानीयः । तत्र श्रीकृष्णस्य भगवत्तानिरूपणं । चतुर्व्यूहकथनं । भगवत्स्वरूपनिरूपणं । अंशबोधकवाक्यानां समाधानं । श्रीकृष्णस्य पूर्णतासंस्थापनं । अवतारप्रसङ्गः । श्रीकृष्णनाममाहात्म्यकीर्त्तनं । अन्यान्यशास्त्रेभ्यो भागवतस्य श्रेष्ठ्यकथनं । अभ्यासनिरूपणं । प्रतिनिधिवाक्यनिरूपणं । सर्व्वशास्त्रसमन्वयः । श्रीकृष्णरूपपरिच्छदादीनां नित्यत्वकीर्त्तनं । असुरेषु यद्रूपं स्फुरति तत्तस्य स्वरूपं न भवति, किन्तु मायाकल्पितमेवेतिकथनं । अनिरुद्धप्रद्युम्नादिलोकनिरूपणं । गोलोकवर्णनं । वृन्दावनवर्णनं । गोलोकगोकुलयोरभेदकथनं । मथुरावर्णनं । द्वारकादीनां नित्यधामत्वनिरूपणं । गोकुलवासिनामप्राकृतदेहत्वादिकथनं । प्रकटाप्रकटद्विविधलीलाव्यवस्था । रुक्मिण्यादीनां श्रीकृष्णस्वरूपशक्तिरूपत्वकथनं । ताभ्यो गोपीनां श्रेष्ठत्वकथनं । तासु च राधिकाया एव श्रेष्ठतमत्वकीर्त्तनञ्च । श्रीकृष्णस्य सर्व्वत्र प्रकाशेऽपि श्रीवृन्दावने वरपरमाद्भुतप्रकाश इति कथनं ।

No. 1659. द्वितीयस्कन्धक्रमसन्दर्भः ।

Substance, country-made yellow paper, 14 × 5 inches. Folia, 44. Lines, 10 on a page. Extent, 1,210 s'lokas. Character, Bengali. Date, ? Place of deposit, S'ántipura, Paṇḍit Kálidása Vidyávagís'a. A second copy in Calcutta, in the Family Library of Dr. Rájendralála Mitra. Appearance, old. Prose. Correct.

Krama-sandarbha. The second book of the last part of the work noticed under No. 1656.

Beginning. द्वितीयक्रमसन्दर्भे सन्दर्भानां समाहृतिः ।

क्रियते यन्निदेशेन स मेऽनन्यगतेर्गतिः ॥

अथ द्वितीयस्कन्धस्य क्रमसन्दर्भः । अथ शुकदेवस्य । अपि मे भगवान् प्रीतः कृष्णः पाण्डुसुतप्रिय इत्यादिना श्रीकृष्ण एव स्वरतिं व्यञ्ज म्रियमाणानां श्रोतव्यादिप्रश्नेनैवान्तकाले श्रीकृष्ण एव मय्युपदिश्यतामिति राजाभिप्रायानन्तरं ।

End. तथा च तृतीये वक्ष्यते,—कुत्र क्षत्तर्भगवत इत्यादिना ।

Colophon. इति द्वितीये दशमः । समाप्तश्चायं द्वितीयस्कन्धक्रमसन्दर्भः ।

विषयः । श्रीधरस्वामिकृतश्रीमद्भागवतीयद्वितीयस्कन्धटीकाया अस्फुटादिस्थानविशदीकरणरूपेयं विवृतिः ।

No. 1660. तृतीयस्कन्धक्रमसन्दर्भः ।

Substance, country-made yellow paper, 14 × 5 inches. Folia, 81. Lines, 11 on a page. Extent, 2,561 s'lokas. Character, Bengali. Date, ? Place of deposit, S'ántipura, Kálidása Vidyávagís'a. A second copy in Calcutta, in the Family Library of Dr. Rájendralála Mitra. Appearance, old. Prose. Correct.

Krama-sandarbha. The third book of the seventh part of the work noticed under No. 1656.

Beginning. तृतीयक्रमसन्दर्भे सन्दर्भाणां समाहृतिः ।

क्रियते यन्निदेशेन समेऽनन्यगतेर्गतिः ॥

अथ तृतीयस्कन्धस्य क्रमसन्दर्भः ॥ १ ॥ यदेत्यत्र यदाश्रयमिति चित्सुखः ॥ २ ॥

End. योऽभिधत्तेमात्रं यो वा शृणोतिमात्रं किमुत अनुतिष्ठति, यः, किमुततरां श्रीदेवहूतिरित्यर्थः ।

Colophon. इति श्रीभागवते तृतीयक्रमसन्दर्भे त्रयस्त्रिंशत्तमोऽध्यायः । समाप्तोऽयं तृतीयस्कन्धक्रमसन्दर्भः ।

विषयः। श्रीधरस्वामिकृतश्रीमद्भागवतदशमस्कन्धटीकाया अस्फुटस्थानादिविशदीकरण-रूपे विवृतिः।

No. 1661. सदुपहाररत्नाकरः।

Substance, country-made yellow paper, 15 × 2½ inches. Folia, 41. Lines, 5 on a page. Extent, 820 s'lokas. Character, Bengali. Date, ? Place of deposit, S'ántipura, Kálidása Vidyávágís'a. Appearance, fresh. Verse. Correct.

Sadupahára-ratnákara. A collection of small poems by distinguished authors, classified and arranged under different heads. By Sarvánanda Kavi. The MS. is incomplete.

Beginning. तिर्य्यग्बद्धाङ्गयष्टिद्वितयभुजलताश्लेषसम्मोददीनं
यावज्जन्मैव तादृङ्मिलदधरसुधास्वादसम्बन्धगन्धं।
अन्योन्यप्रेक्षितोद्यत् स्मितसुभगमुखं पातु वश्चन्द्रमौलेः
स्त्रीपुंरूपात्मदेहप्रणयनघटनापाटवं कामुकस्य॥
अर्थप्रौढिमगाढबन्धघटनापादावरोहक्रम-
श्रव्यं यद् यदकारि सत्कविकुलैरन्यापदेशाभिधं।
तत्तत् पद्यमतीव हृद्यमधुना सञ्चित्य यत्नादमौ
सर्व्वानन्दकविः करोति कुतुकादेकत्र सत्प्रीतये॥
सभाहृदयरञ्जकस्फुरदनेकपद्यावली-
मणिप्रकरजन्मभाक् स्फुटरसामृतस्यन्दभूः।
प्रसादशशिसम्भवभ्रमदनेककीर्त्तिर्मया
व्यधायि बुधसम्मुदे सदुपहाररत्नाकरः॥

End. न चुम्बति मनागपि भ्रमर एष पुष्पान्तरं
परिभ्रमति पार्श्वतो विटपपद्मिनीलम्पटः।
प्रयाति यदि यामिनी त्यजति मौनमुद्राञ्च सा
निपीय मधु निर्भरं मुदमुपैति पुष्पन्धयः॥
इतः खण्डितत्वात् परिशेषवाक्यं नास्ति।

विषयः। प्रायः प्रास्ताविकश्लोकानाहृत्य व्रज्याक्रमेण रचितोऽयं ग्रन्थ। तत्र दुर्ज्जननिन्दा-सज्जनस्तुती। शङ्करव्रज्या। गौरीव्रज्या। शैवगणव्रज्या। विष्णुव्रज्या। लक्ष्मी-व्रज्या। सरस्वतीव्रज्या। मदनव्रज्या। दशावतारव्रज्या। सूर्य्यव्रज्या। चन्द्र-

त्रज्या। सूर्य्याचन्द्रत्रज्या। पवनत्रज्या। कल्पवृक्षत्रज्या। मेघत्रज्या। दैवत्रज्या। गृहत्रज्या। प्रदीपत्रज्या। सुजनत्रज्या। दुर्ज्जनत्रज्या। सुजनदुर्ज्जनत्रज्या। गुणित्रज्या। पामरत्रज्या। धनित्रज्या। दरिद्रत्रज्या। वीरत्रज्या। स्त्रीत्रज्या। अलङ्कारत्रज्या। सुवर्णत्रज्या। मृगमदत्रज्या। गिरित्रज्या। अगुरुत्रज्या। चन्दनत्रज्या। श्रीफलत्रज्या। चूतत्रज्या। पनसत्रज्या। वदरीत्रज्या। अशोकत्रज्या। किंशुकत्रज्या। अश्वत्थत्रज्या। वटत्रज्या। शाल्मलित्रज्या। भ्रमरत्रज्या।

इतः खण्डितं।

No. 1662. अलङ्कारकौस्तुभः।

Substance, country-made paper, 13 × 4½ inches. Folia, 103. Lines, 9—10 on a page. Extent, 4,120 s'lokas. Character, Bengali. Date, Sk. 1681. Place of deposit, S'ántipura, Kálidása Vidyávágís'a. A second copy in Calcutta, in the Family Library of Dr. Rájendralála Mitra. Appearance, very old. Prose and verse. Correct.

Alaṅkára-kaustubha. A treatise on Rhetoric. By Kavikarṇapura, one of the followers of Chaitanya. The work is divided into ten chapters, or "rays" (*kiraṇa*), and illustrates every figure of speech and rhetorical ornament by a verse in praise of Krishṇa. The MS. is dated S'aka 1681 = A. D. 1760. The author was a renowned Vaishṇava, and wrote several works on the Vaishṇava faith. Vide Introduction to Dr. Mitra's edition of the Chaitanya Chandrodaya Nátaka.

Beginning. ग्रन्थारम्भे स्वाभीष्टदेवतानामगुणकीर्त्तनात्मकं मङ्गलमङ्गीकुर्व्वन् ग्रन्थकारो ग्रन्थस्य निर्व्विघ्नां परिसमाप्तिमाशास्ते।

स्वानन्दरससद्वर्णः कृष्णश्चैतन्यविग्रहो जयति।
आपामरमपि कृपया सुधया स्नपयाम्बभूव भूमौ यः॥
स जयति येन प्रभवति सुदृशां दृशि व्यञ्जनावृत्तिः।
अतिशयितपदपदार्थो ध्वनिरिव मुरलीध्वनिर्मुरारातेः।

जयतिरत्राकर्म्मकः सर्व्वोत्कर्षवाचकः, तेन नमस्कारोऽपि व्यज्यते, स्वापकर्षबोधानुकूलव्यापारविशेषो नमस्कार इति न्यायात्॥ इत्यादि।

